पदार्थः—हे मनुष्याः ! भवन्तः (मित्रस्य) अध्यापकस्य (वरुणस्य) उपदेशकस्य च (धाम) पदम् (शंस) प्रशंसन्तु तयोरध्यापकोपदेशकयोः (शुष्मः) बलं (रोदसी) द्यावापृथिव्योर्मध्ये (महित्वा) महत्वाय (बद्धधे) संसारमर्यादां बध्नातु (अयज्वनाम्) अयज्ञानाम् अकर्मणाम् संतानाः (अवीराः) वीरत्वधर्मरहिताः भवेयुः, अन्यच्च तेषाम् (मासाः) समयाः (अयन्) वीरसन्तानरहिता भवेयुः (प्र यज्ञमन्मा) यज्वानः (वृजनं) वलं (तिराते) वर्द्धयन्तु ॥

भावार्थः—परमात्मोपदिशति—भो जनाः ! अस्मिन् जगति अध्यापकानामुपदेशकानाञ्च सर्वोपरि पदं वर्त्तते. अतो भवद्भिः तत्पदस्य सर्वथैव रक्षणं कार्य्यम्, अन्यच्च अयज्ञानामकर्मणां निष्फल एव सन्तानो याति, यतश्च ईश्वराज्ञानुयायिनः ईश्वरनियमं पालयन्ति, अतएव ते सुखिनः, ये ईश्वरीयनियमान् न पालयन्ति तेषां मासा दिनान्यपि दुःखेन यान्ति, इत्यभिप्रायेणोक्तं तेषां मासा अवीरा एव अयन् अगच्छन्नित्यर्थः ॥

अस्येदमेव तात्पर्य्यं यत्सर्वेषां पापानां मूलकारणमेकमज्ञानमेव, अतः पूर्वं भवद्भिः अध्यापकोपदेशकयोरेव वृद्धिः कर्तव्या, कुतः यतश्च यस्मिन्देशे अध्यापकानां उपदेशकानां च बलं न वर्द्धते तस्मिन्देशे अज्ञानस्य मूलोच्छेदोऽपि न भवति प्रत्युत अज्ञानप्राबल्येन सर्वत्रानैश्वर्य्यस्य दारिद्र्यस्य च प्रचारो भवति, अस्य निवृत्त्यर्थं परमात्मना अध्यापकोपदेशकाश्चाव्याहतगतय उत्पादिताः ॥

इत्यभिप्रायेणैव **"काम एष क्रोध एष."** गी० ३।३७ अत्र भगवता कृष्णन अज्ञानमूलोच्छेदनमेवोपदिष्टम्, कुतः यतश्च अज्ञानमूलोच्छेदनं विना कदाचिदपि जगति कल्याणं नोत्पद्यते, सम्भाव्यते चेदं यद्भगवता कृष्णेन अयं भावः अस्मादेव मन्त्राद् गृहीतः ॥

पदार्थ—हे मनुष्यो ! तुम (मित्रस्य, वरुणस्य, धाम) अध्यापक तथा उपदेशकों के पदों को (शंस) प्रशंसित करो (शुष्मः) जिनका बल (रोदसी) द्युलोक तथा पृथ्वीलोक में (महित्वा) महत्व के लिए (बद्बधे) संसार की मर्य्यादा बांधे (अयज्वनां) अयज्ञशील-अकर्मी (अवीराः) वीरसन्तानों से रहित होकर (मासाः) दिन (अयन्) व्यतीत करें और (प्रयज्ञमन्मा) विशेषता से यज्ञशील सत्कर्मी पुरुष (वृजनं) सब विपत्तियों से मुक्त होकर (तिराते) जगत् का उद्धार करें ॥

भावार्थ—परमात्मा उपदेश करते हैं कि हे मनुष्यो ! संसार में सबसे उच्च पद अध्यापक तथा उपदेशकों का है, तुम लोग इनके पद की रक्षा के लिए यत्नवान् होओ ताकि इनका बल बढ़कर संसार के सब अज्ञानादि पापों का नाशक हो, और संसार मर्यादा में स्थिर रहे ।।

तात्पर्य्य यह है कि संसार में सब पापों तथा अवनतियों का मूल कारण एकमात्र अज्ञान ही है इसलिए तुमको सबसे पहले अज्ञान की जड़ काटने के लिए अध्यापक तथा उपदेशक बढ़ाने चाहियें, क्योंकि जिस देश में उपदेशक और अध्यापकों की बलवृद्धि नहीं होती उस देश में अज्ञान की जड़ भी नहीं कट सकती प्रत्युत अज्ञान की सन्तति बढ़कर अनैश्वर्य्य और दारिद्र सर्वत्र फैल जाता है, इसी दारिद्रय की निवृत्ति के लिए परमात्मा ने पृथ्वी तथा अन्तरिक्ष लोक में अव्याहतगति अर्थात् बिना रोकटोक से गतिशील होने के लिए अध्यापक तथा उपदेशकों के कर्त्तव्यों का वर्णन किया है ।।

इसी भाव से कृष्णजी ने **"काम एष क्रोध एषः"** गी. ३।३७ में अज्ञान की जड़ काटने का उपदेश करते हुए बलपूर्वक कहा है कि जब तक ज्ञानरूप शस्त्र से अज्ञान का छेदन नहीं किया जाता तब तक संसार का कल्याण कदापि नहीं हो सकता, ज्ञात होता है कि यह भाव कृष्णजी ने इसी स्थल के वेदमन्त्रों से लिया है ।।४।।

अमूरा विश्वा वृषणाविमा वां न यासु चित्रं ददृशे न यक्षम् ।
द्रुहः सचन्ते अनृता जनानां न वां निण्यान्यचिते अभूवन् ।।५।।

अमूरा । विश्वा । वृषणौ । इमाः । वां । न । यासु । चित्रं । ददृशे । न । यक्षं । द्रुहः । सचन्ते । अनृता । जनानां । न । वां । निण्यानि । अचिते । अभूवन् ।। ५ ।।

पदार्थः—अध्यापकोपदेशकयोः (यासु) क्रियासु (चित्रं) वैचित्र्यं=शक्तेर्वैलक्षण्यमित्यर्थः (न, ददृशे) न दृष्टिगतं भवति (न यक्षं) यासु न पूजायोग्यः कश्चिद्भावः (इमाः विश्वा) तौ अध्यापकोपदेशकौ (वां) युवां प्रति (वृषणौ) सदुपदेशस्य वृष्टिकर्त्तारौ(न) न भवतः, अन्यच्च (वां) युवा प्रति (ते) एवंविधा अध्यापकोपदेशकाः ये (द्रुहःसचन्ते) द्विषन्ति तेषां (अनृता) अनृतानि (निण्यानि) वचांसि (जनानां) (अचिते) अज्ञानाय (अभूवन्) भवन्ति अतएव (अमूरा) अज्ञानरहिताः भवन्तः सर्वे सदुपदेशकान् स्वीकुर्य्युः ।।

भावार्थः—परमात्मोपदिशति, हे जनाः ! भवन्तः सर्वे अध्यापकोपदेशकयोर्विषये सर्वदैव अज्ञानरहिता भवेयुः, यतस्ते सर्वे उपदेशका अध्यापकाश्च वाग्मिनः सत्यवादिनश्च भवेयुः अन्यच्च ते स्तुतिनिन्दाकर्त्तारोऽपि न स्युः अर्थात्सर्वदैव सरलप्रकृतयः सत्यवादिनो वेदाध्ययनप्रियाश्च अध्यापकस्य उपदेशकस्य च पदे भवद्भिः स्थापनीयाः ।।

पदार्थ—(यासु) जिन उपदेशक तथा अध्यापकों की क्रिया में (चित्रं) विचित्र शक्तियें (न, ददृशे) नहीं देखी जाती (न, यक्षं) न जिनमें श्रद्धा का भाव है वे (विश्वा) सम्पूर्ण संसार में (इमाः, वृषणौ) अपनी वाणी की वृष्टि (न) नहीं कर सकते, और जो (वां) तुम्हारे उपदेशक

तथा अध्यापक (जनानां) मनुष्यों की (अनृता, द्रुहः, सचन्ते) निन्दा वा दुश्चरित्र कहते हैं उनकी (निण्यानि) वाणियें (अचिते, अभूवन्) अज्ञान की नाशक नहीं होती, इसलिए (अमूरा) तुम लोग पूर्वोक्त दोषों से रहित होओ, यह परमात्मा का उपदेश है॥

भावार्थ—जिन अध्यापक वा उपदेशकों में वाणी की विचित्रता नहीं पाई जाती और जिनकी वेदादि सच्छास्त्रों में श्रद्धा नहीं है उनके अज्ञान निवृत्तिविषयक भाव संसार में कभी नहीं फैल सकते और न उनकी वाणी वृष्टि के समान सद्गुणरूप अंकुर उत्पन्न कर सकती है, इसी प्रकार जो अध्यापक वा उपदेशक रात्रि दिन निन्दा स्तुति में तत्पर रहते हैं वह भी दूसरों की अज्ञानग्रन्थियों का छेदन नहीं कर सकते, इसलिए उचित है कि उपदेष्टा लोगों को निन्दास्तुति के भावों से सर्वथा वर्जित रहकर अपने हृदय में श्रद्धा के अंकुर दृढ़तापूर्वक जमाने चाहियें, ताकि सारा संसार आस्तिक भावों से विभूषित हो॥५॥

अथ वेदज्ञा एवोपदेशका भवेयुरित्युपदिश्यते—

अब परमात्मा उपदेशकों के वेदवाणीयुक्त होने का उपदेश करते हैं:—

समु वां यज्ञं महयं नमोभिर्हुवे वां मित्रावरुणा सबाधः।
प्र वां मन्मान्यृचसे नवानि कृतानि ब्रह्म जुजुषन्निमानि॥ ६॥

सं। ऊं इति। वां। यज्ञं। महयं। नमःऽभिः। हुवे। वां। मित्रावरुणा। सऽबाधः। प्र। वां। मन्मानि। ऋचसे। नवानि। कृतानि। ब्रह्म। जुजुषन्। इमानि॥ ६॥

पदार्थः—(मित्रावरुणा) हे अध्यापकोपदेशकौ! (वां) युवयोः (महयं) सत्काराहँ यज्ञं (सबाधः) जिज्ञासुरहं (नमोभिः) सत्कारैः (समु) सम्यक्तया (हुवे) स्वीकुर्याम् अन्यच्च (वां) युवयोः करुणया (नवानि, मन्मानि) नूतनव्याख्यानानि (प्र ऋचसे) पदार्थज्ञानविवृद्धये (कृतानि) दत्तानि, अन्यच्च (वां) युवयोः इमानि व्याख्यानानि (ब्रह्म, जुजुषन्) ब्रह्मसंबन्धीनि॥

भावार्थः—ईश्वरो वदति—हे अध्यापकोपदेशकौ! भवतोः प्रवचनरूपः=अध्यापनरूपः उपदेशरूपश्च यज्ञः मयाऽऽद्रियते, अन्यच्च वेदार्थबोधकानि यानि यानि नूतनानि व्याख्यानानि तानि तानि भवद्भिः सर्वदैव दातव्यानि, यैर्वेदस्य ख्यातिर्वर्द्धेत, तद्द्वारा स्वजीवनमपि सफलीकुरुतां भवन्तौ, अस्मिन् मन्त्रे यत्कृतानि इति पदं तन्न मनुष्यस्य कृतिं बोधयति, अपि तु ईश्वरस्यैव कृतिं बोधयति, कुतः वेदानामीश्वरज्ञानत्वात् नित्यत्वाच्च, प्रतिपादितं चैतत्—**"अस्य वा महतो भूतस्य निःश्वसितं यदृग्वेदो यजुर्वेदः सामवेद अथर्वाङ्गिरसः"** बृहदा० ४।५।११ इत्यत्रेति॥

पदार्थ—(मित्रावरुणा) हे अध्यापक तथा उपदेशको (सबाधः) मैं जिज्ञासु (वां) तुम्हारे (महयं, यज्ञं) प्रशंसनीय यज्ञ को (सं, ऊं) भलेप्रकार (नमोभिः) सत्कारपूर्वक (हुवे) ग्रहण करता हूं (वां) आपके (नवानि) नये (मन्मानि) व्याख्यान (प्र ऋचसे) पदार्थ ज्ञान के बढ़ानेवाले हैं, और (वां) आपके (कृतानि) दिये हुए (इमानि) ये व्याख्यान (ब्रह्म, जुजुषन्) परमात्मा के साथ जोड़ते हैं।

भावार्थ—हे अध्यापक तथा उपदेशको! मैं जिज्ञासु तुम्हारे यज्ञों को सत्कारपूर्वक स्वीकार करता हुआ प्रार्थना करता हूं कि आपके उपदेश मुझे ब्रह्म की प्राप्ति करायें॥ ६॥

इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि ।
विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

इयं । देवा । पुरःऽहितिः । युवऽभ्यां । यज्ञेषु । मित्रावरुणौ । अकारि । विश्वानि । दुःऽगा । पिपृतं । तिरः । नः । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

पदार्थः—(मित्रावरुणौ) हे अध्यापकोपदेशकौ (युवभ्यां) भवद्भ्यां (यज्ञेषु) यज्ञादिषु (इयं, देव, पुरोहितिः) देवानां हितकारिणीयं वाक् (अकारि) कृता, अन्यच्च (नः) अस्माकं (विश्वानि) सम्पूर्णानि (दुर्गा) विषमाणि विघ्नानीत्यर्थः (तिरः) तिरस्कृत्य (पिपृतं) नाशयतम्, यूयं (स्वस्तिभिः) कल्याणकारिणीभिर्वाणीभिः (सदा) सर्वदा (नः) अस्मान् (पात) रक्षत ॥

भावार्थः—परमात्मोपदिशति, कर्मोपासनाज्ञानात्मकेषु यज्ञेषु अध्यापकोपदेशकाभ्यामेव पुरोहितस्य कर्म्म कारयितव्यम्, नान्येभ्यः, यत एवंविधा विद्वांसः याज्ञिका भवन्ति अत एभ्य एव स्वस्तिवाचनस्य प्रार्थना करणीया नान्येभ्य इति ॥

पदार्थ—(मित्रावरुणौ, युवभ्यां) अध्यापक और उपदेशक आप दोनों (यज्ञेषु) यज्ञों में (इयं, देव, पुरोहितिः) सब विद्वानों के हित करनेवाली वाणी (अकारि) कथन करें और (नः) हमारी (विश्वानि, दुर्गा) सब प्रकार की विषमता को (तिरः) तिरस्कार करके (पिपृतं) नष्ट करें, (यूयं) आप लोग (नः) हमको (सदा) नित्यप्रति (स्वस्तिभिः) अपनी मंगलप्रद वाणियों से (पात) कल्याणदायक उपदेश करते रहें ॥

भावार्थ· परमात्मा उपदेश करते हैं कि कर्म, उपासना तथा ज्ञान इन तीनों प्रकार के यज्ञों में अध्यापक तथा उपदेशक ही पुरोहित का कार्य्य करते और यही जनता=जनसमूह को सब विघ्नों से बचाकर उसकी रक्षा करते हैं, इसलिये जनता को समष्टिरूप से इनसे स्वस्ति की प्रार्थना करनी चाहिये ॥ ७ ॥ ३ ॥

इकसठ ६१वां सूक्त समाप्त हुआ ॥

॥ ६२ ॥ १—६ वसिष्ठ ऋषिः ॥ १—३ सूर्य्यः । ४—६ मित्रावरुणौ देवते । छन्दः—१, २, ६ विराट त्रिष्टुप् । ३, ४, ५ निचृत्त्रिष्टुप् ॥ धैवतः स्वरः ॥

अथास्मिन् सूक्ते सर्वप्रकाशकस्य परमात्मनो वर्णनं क्रियते—

अब इस सूक्त में सर्वप्रकाशक परमात्मा का वर्णन करते हैं—

उत्सूर्यो बृहदर्चींष्यश्रेत्पुरु विश्वा जनिम मानुषाणाम् ।
समो दिवा ददृशे रोचमानः क्रत्वा कृतः सुकृतः कर्तृभिर्भूत् ॥ १ ॥

उत्। सूर्य॑ः। बृहत्। अ॒र्चींषि॑। अ॒श्रे॒त्। पु॒रु। विश्वा॑। जनि॑म। मानु॑षाणा॑म्। स॒मः। दि॒वा। द॒दृ॒शे॒। रोच॑मानः। क्रत्वा॑। कृ॒तः। सु॒ऽकृ॒तः। क॒र्तृऽभिः॑। भू॒त्॥ १॥

पदार्थः—(सूर्य्यः) सरति=सर्वं व्याप्नोतीति सूर्यः अथवा सुवति=सर्वं जनयतीति सूर्य्यः=सर्वजगदुत्पादकः परमात्मा (बृहत्, अर्चींषि) बहूनि तेजांसि (उत्, अश्रेत्) धारयति, अन्यच्च (मानुषाणां) मनुष्याणां (पुरु, विश्वा, जनिम) अनन्त-जन्मानि कृतवान् अन्यच्च (समः, दिवा) सदैव (रोचमानः) प्रकाशमानः (ददृशे) दृष्टिगतो भवति, कीदृशः स सूर्य्यः (कर्तृभिः) स्तुतिकर्तृभिः (सुकृतः) सर्वोपरि वर्णितः (क्रत्वा, कृतः, भूत्) यज्ञरूपोऽस्ति॥

भावार्थः—हे मनुष्याः! भवद्भिः सर्वप्रकाशकः परमात्मा उपासनीयः, यश्च भूतभविष्यद्वर्त्तमानकालत्रयस्य वेत्ता सदैकरसः, उत्पत्तिविनाशशून्य इत्यर्थः, यस्य वर्णनं नानाविधरचनया मुक्तकण्ठमहर्निशं क्रियते स परमात्मा भवतामुपास्यदेवः, अयमेव भावः **"सूर्य आत्माजगतस्तस्थुषश्च"** यजु० १३।४६ अस्मिन्मन्त्रे वर्णितः। सूर्यः=सर्वप्रकाशकः जगतः=जङ्गमस्य, तस्थुषः=स्थावरस्य च आत्मा स्वामीत्यर्थः, येषां तु भौतिकसूर्य्य एव उपास्यदेवोऽत्राभिमतः तैः **"सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्"** ऋग्० १०।१९०।३ **"चक्षोः सूर्यो अजायत"** यजु. ३१।१२ इत्यादि मन्त्रेभ्य इयमेव शिक्षा ग्राह्या यत् यत्र यत्र सूर्य्यशब्दस्य कार्य्यवाचित्वं तत्र तत्रैव भौतिक-सूर्य्याभिधायित्वं नान्यत्रेति॥

अत्रेदमेव तात्पर्यं यत् कार्य्यवाची सूर्य्यशब्दः भौतिक सूर्य्यस्य वाचकः कारणवाची सूर्य्यशब्दस्तु परमात्मन एव वाचकः नान्यस्येति, एतच्च **"तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः"** यजु० ३२।१ इत्यादिषु स्फुटमेव, इत्यादिभिः हेतुभिरत्र सूर्य्य-नाम्ना परमात्मन एव ग्रहणं नान्यस्य॥

पदार्थ—(सूर्यः) सबके उत्पादक परमात्मा का (बृहत्, अर्चींषि) बड़ी ज्योतियां (अश्रेत्) आश्रय करती हैं जो (विश्वा, मानुषाणां) निखिल ब्रह्माण्ड में स्थित मनुष्यों के (पुरु, जनिम) अनन्त जन्मों को (ददृशे) जानता और (समः, दिवा) सदा ही (रोचमानः) स्वतःप्रकाश है, वही (क्रत्वा कृतः) यज्ञरूप है और (कर्तृभिः) इस चराचर ब्रह्माण्ड की रचना ने जिसको (सुकृतः, भूत) सर्वोपरि रचयिता वर्णन किया है॥

भावार्थ—हे मनुष्यो! तुम उसी एकमात्र परमात्मा का आश्रयण करो जो सब मनुष्यों के भूत, भविष्यत् तथा वर्त्तमान जन्मों को जानता, सदा एकरस रहता और जिसको इस चराचर ब्रह्माण्ड की रचना प्रतिदिन वर्णन करती है, वही स्वतःप्रकाश परमात्मा मनुष्यमात्र का उपास्यदेव है, इसी भाव से **"सूर्य आत्मा जगतस्तस्थुषश्च"** यजु. १३।४६ में परमात्मा का सूर्य्य नाम से वर्णन किया है॥

जो लोग सूर्य्य नाम से इस भौतिक सूर्य्य का ग्रहण करके इसी को उपास्यदेव मानते हैं उनको पूर्वोक्त मन्त्रों से यह भाव ग्रहण करना चाहिये कि वेद सूर्य्य नाम से सर्वत्र भौतिक सूर्य्य का वर्णन नहीं करता, हां जहां रचनाविशेष के अभिप्राय से सूर्य्य चन्द्रमादि नाम आते हैं वहां इन नामों से भौतिक सूर्य्य का ग्रहण जानना चाहिये, जैसा कि **"सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्"** ऋग्. १०।१९०।३ और **"चक्षोःसूर्य्यो अजायत"** यजु. ३१।१२ इत्यादि मन्त्रों से स्पष्ट है॥

तात्पर्य्य यह है कि कार्य्यवाची "सूर्य्य" शब्द भौतिक सूर्य्य का ग्रहण कराता और कारणवाची "सूर्य" शब्द परमात्मा का ग्राहक है, यही सर्वत्र जानना व मानना चाहिये। इस सूक्त में "सूर्य" शब्द कारणवाची होने से परमात्मा का वाचक तथा ग्राहक है, जैसा कि **"तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः"** यजु. ३२।१ इस मन्त्र में अग्न्यादि नाम परमात्मा के हैं इसी प्रकार यहाँ भी सूर्य नाम परमात्मा का है किसी जड़ पदार्थ का नहीं ॥ १ ॥

अधुना तत्साधनान्युपदिश्यन्ते—

अब परमात्मप्राप्ति के साधन कथन करते हैं:—

स सू॑र्य॒ प्रति॑ पु॒रो न॒ उद्गा॑ ए॒भिः स्तोमे॑भिरेत॒शेभि॒रेवैः॑ ।
प्र नो॑ मि॒त्राय॒ वरु॑णाय वो॒चोऽना॑गसो अर्य॒म्णे अ॒ग्नये॑ च ॥ २ ॥

सः । सू॒र्य॒ । प्रति॑ । पु॒रः । न॒ः । उत् । गाः॑ । ए॒भिः । स्तोमे॑भिः । ए॒त॒शेभि॑ः । एवैः॑ । प्र । न॒ः । मि॒त्राय॑ । वरु॑णाय । वो॒चः । अना॑गसः । अर्य॒म्णे । अ॒ग्नये॑ । च॒ ॥ २ ॥

पदार्थः—(सूर्य्य) सरति=सर्वत्र व्याप्नोतीति सूर्य्य=हे परमात्मन्! (सः) प्रसिद्धस्त्वम् (एभिः, स्तोमेभिः) एतैर्यज्ञैः (नः) अस्माकं (प्रति, पुरः) हृदये (उद्गाः) आगच्छ (एतशेभिः) निष्कामकर्मभिः (एवैः) निश्चयेन (नः) अस्माकं (मित्राय) अध्यापकाय (वरुणाय) उपदेशकाय (अर्यम्णे) न्यायकारिणे (अग्नये) विज्ञानवते च (प्रवोचः) धर्ममुपदिश, यतः (अनागसः) निष्कामकर्मणां संसारे प्रचारो भवेत् ॥

भावार्थः—जपयज्ञो योगयज्ञो ध्यानयज्ञश्चैवंविधाः प्रचुराः यज्ञाः परमात्मप्राप्तेः साधनत्वेन विवक्षिताः यैः यत्रैः निष्कामकर्मद्वारेण परमात्मप्राप्तिर्भवति, अस्मिन् मन्त्रे परमात्मा अध्यापकानुपदेशकान् सत्कर्मणो विज्ञानिनश्च इदमुपदिशति यद्भवद्भिः यज्ञकर्मोपदेश्यं यतो जगति सर्वत्र निष्कामकर्मणां प्रचारो भवेत् ।

पदार्थ—(सूर्य) हे परमात्मन् (सः) आप (एभिः, स्तोमेभिः) इन यज्ञों से (नः) हमारे (प्रति, पुरः) हृदय में (उद्वाः) प्रकट हों (एतशेभिः) जो निष्कामकर्म द्वारा साधन किये जाते हैं उनका (एवैः) निश्चयकरके (नः) हमारे (मित्राय, वरुणाय) अध्यापक, उपदेशक (अर्यम्णे) न्यायकारी (च) और (अग्नये) विज्ञानी पुरुषों के लिए (प्र, वोचः) उपदेश करें कि तुम (अनागसः) संसार में निष्कामता का प्रचार करो जिससे विद्वानों के समक्ष निर्दोष सिद्ध हो ॥

भावार्थ—जपयज्ञ, योगयज्ञ तथा ध्यानयज्ञ, इत्यादि यज्ञ परमात्मप्राप्ति के साधन हैं जिनके द्वारा निष्कामकर्मी को परमात्मा की प्राप्ति होती है, इस मन्त्र में परमात्मा अध्यापक, उपदेशक तथा विज्ञानी पुरुषों को उपदेश करते हैं कि तुम लोग इन यज्ञों का प्रचार करो ताकि निष्कामता फैलकर संसार का उपकार हो ॥२॥

वि नः॑ स॒हस्रं॑ शु॒रुधो॑ रदन्त्वृ॒तावा॑नो॒ वरु॑णो मि॒त्रो अ॒ग्निः ।
यच्छ॑न्तु च॒न्द्रा उ॑प॒मं नो॑ अ॒र्कमा न॒ः कामं॑ पूपुरन्तु॒ स्तवा॑नाः ॥३॥

वि । नः । सहस्रं । शुरुधः । रदन्तु । ऋतऽवानः । वरुणः । मित्रः । अग्निः । यच्छन्तु । चन्द्राः । उपऽमं । नः । अर्कं । आ । नः । कामं । पूपुरन्तु । स्तवानाः ॥ ३ ॥

पदार्थः—हे परमात्मन् ! (स्तवानाः) यथार्थगुणसम्पन्नाः (वरुणः) उपदेशकः (मित्रः) अध्यापकः (अग्निः) विज्ञानी (चन्द्राः) जीवन्मुक्ताः, इत्यादयो विद्वांसः (नः) अस्माकं (कामं) कामनाम् (आ, पूपुरन्तु) साध्नुवन्तु, अन्यच्च (नः) अस्मभ्यं (सहस्रं) सहस्रप्रकारकं (शुरुधः) सुखं (यच्छन्तु) ददतु, अन्यच्च (ऋतावानः) सत्यवादिनो विद्वांसः (नः) अस्मभ्यम् (उपमं, अर्कं) परमात्मनः सर्वोपरि ज्ञानं (विरदन्तु) प्रयच्छन्तु ॥

भावार्थः—अस्मिन् मन्त्रे प्रकाशस्वरूपस्य परमात्मनोऽग्रे इयमेव प्रार्थना यत् हे भगवन् ! अध्यापकोपदेशकज्ञानिविज्ञानिविद्वद्भिर्भवता मह्यं सत्योपदेशः दापयितव्यः, अन्यच्च विविधप्रकारकं सुखं सत्यादि धनञ्च दापयितव्यं, येन वयं पवित्रीभूय भवतां सदैव कृपापात्राणि भवेम ॥

पदार्थ—हे परमात्मन् ! (स्तवानाः) यथार्थगुणसम्पन्न (वरुणः) उपदेशक (मित्रः) अध्यापक (अग्निः) विज्ञानी (चन्द्राः) प्रसन्नता देनेवाले विद्वान् (नः, कामं) हमारी कामनाओं को (पूपुरन्तु) पूर्ण करें (आ) और (वि) विशेषता से (नः) हमको (सहस्रं) सहस्रों प्रकार के (शुरुधः) सुख (यच्छन्तु) दें (ऋतावानः) सत्यवादी विद्वान् (नः) हमको (उपमं, अर्कं) अनुपम परमात्मा का ज्ञान (रदन्तु) प्रदान करें ॥

भावार्थ—इस मन्त्र में प्रकाशस्वरूप परमात्मा से यह प्रार्थना है कि हे भगवन् ! आप हमको अध्यापक, उपदेशक, ज्ञानी तथा विज्ञानी विद्वानों द्वारा सत्य का उपदेश करायें और अनन्त प्रकार का सुख, सत्यादि धन और जीवन में पवित्रता दें ताकि हम शुद्ध होकर आपकी कृपा के पात्र बनें ॥३॥

द्यावाभूमी अदिते त्रासीथां नो ये वां जज्ञुः सुजनिमान ऋष्वे ।
मा हेळे भूम वरुणस्य वायोर्मा मित्रस्य प्रियतमस्य नृणाम् ॥ ४ ॥

द्यावाभूमी इति । अदिते । त्रासीथां । नः । ये । वां । जज्ञुः । सुऽजनिमानः । ऋष्वे इति । मा । हेडे । भूम । वरुणस्य । वायोः । मा । मित्रस्य । प्रियऽतमस्य । नृणाम् ॥ ४ ॥

पदार्थः—(द्यावाभूमी) हे प्रकाशस्वरूप सर्वाधार ! (अदिते) अखण्डनीय परमात्मन् ! (नः) अस्मान् (त्रासीथां) त्रायस्व (ऋष्वे) हे सर्वोपरि विराजमान जगदीश्वर ! (वां) शक्ति द्वयरूपेणास्थितं त्वां (ये सुजनिमानः) पुण्यकर्माणः (जज्ञुः) ज्ञातवन्तः तेषामुपरि (नृणां प्रियतमस्य) लोकानामिष्टतमस्य (नः) अस्माकं (वरुणस्य) अपानवायोः (मित्रस्य, वायोः) प्राणवायोश्च वयं (हेडे) प्रकोपे (मा भूम) मा स्याम ॥

भावार्थः—हे सर्वोपरिवर्त्तमान परमात्मन् ! मनुष्यजन्म धृत्वाऽस्माभिः सच्चिदानन्दस्वरूपः त्वमुपलब्धः, अन्यच्चास्माकं त्वमेक एव स्वामी, अतोऽस्माभिरदं प्रार्थ्यते यत् अस्मभ्यं प्राणापानवायू मा प्रकुप्यताम्, उक्तवायुद्वयस्य संयमात् प्राणापानगती बुध्वा अनया दिशा प्राणायामेन भवत्स्वरूपज्ञानमनुभवाम इममेवास्माकमभ्यर्थनेति ।।

पदार्थ—(द्यावाभूमी, अदिते) हे प्रकाशस्वरूप, सर्वाधार, अखण्डनीय परमात्मन् ! आप (नः) हमारी (त्रासीथां) रक्षा करें, (ऋष्वे) हे सर्वोपरिविराजमान जगदीश्वर ! (ये, सुजनिमानः) जो मनुष्यजन्मवाले हमने (वां) आपको (जज्ञुः) जाना है, इसलिए (वरुणस्य, वायोः) प्राणवायु (नृणां, प्रियतमस्य) जो मनुष्यों को प्रिय है उसका कोप (मा) न हो और (मित्रस्य) अपानवायु का भी (हेडे) प्रकोप (मा, भूम) मत हो ।

भावार्थ—हे सर्वोपरि वर्त्तमान परमात्मन् ! आप सच्चिदानन्दस्वरूप हैं, हमने मनुष्य जन्म पाकर आपको लाभ किया है इसलिए हम प्रार्थना करते हैं कि हम पर प्राणवायु का कभी प्रकोप न हो और नाही हम पर कभी अपानवायु कुपित हो, इन दोनों के संयम से हम सदैव आपके ज्ञान का लाभ उठायें अर्थात् प्राणों के संयमरूप प्राणायाम द्वारा हम आपके ज्ञान की वृद्धि करते हुए प्राणापान वायु हमारे लिये कभी दुःख का कारण न हों, यह प्रार्थना करते हैं ।।४।।

अथ स्वभावोक्त्यलङ्कारेण प्राणापानौ संबोध्य इन्द्रियसंयमः प्रार्थ्यते—

अब स्वभावोक्ति अलंकार से प्राणापान को संबोधन करके इन्द्रियसंयम की प्रार्थना करते हैंः—

प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन ।
आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा ॥ ५ ॥

प्र । बाहवा । सिसृतं । जीवसे । नः । आ । नः । गव्यूर्ति । उक्षतं । घृतेन । आ । नः । जने । श्रवयतं । युवाना । श्रुतं । मे । मित्रावरुणा । हवा । इमा ।। ५ ।।

पदार्थः—(मित्रावरुणा) हे प्राणापानरूपवायू ! (नः) अस्माकं (जीवसे) जीवनार्थम् (प्र) विशेषतया (बाहवा) युवाभ्यां शक्तिरूपौ भुजौ (सिसृतं) प्रसारयतम्, अपरञ्च (नः) अस्माकं (गव्यूर्ति) इन्द्रियगणं (घृतेन) सुस्निग्धतया सुमार्गे (उक्षतं) सिञ्चतम्, हे प्राणापानौ ! भवन्तौ (युवाना) सदैव युवावस्थां प्राप्तौ, अत एव (नः) अस्माकं (जने) मादृशे मनुष्ये (आ) किञ्च (श्रुतं) ज्ञानगतिं (श्रवयतं) वर्द्धयताम् (मे) मम (इमा, हवाः) प्राणापानरूपा आहुतीः (श्रुतं) प्रवाहिताः कुरुताम् ।।

पदार्थ—(मित्रावरुणा) हे प्राणापानरूप वायो ! आप (नः) हमारे (जीवसे) जीवन के लिए (प्र) विशेषता से (वाहवा, सिसृतं) प्राणापानरूप शक्ति को विस्तारित करें (आ) और (नः) हमारी (गव्यूर्ति) इन्द्रियों को (घृतेन, उक्षतं) अपनी स्निग्धता से सुमार्ग में सिंचित करें, हे प्राणापान ! आप नित्य (युवाना) युवावस्था को प्राप्त हैं इसलिए (नः, जने) हमारे जैसे मनुष्यों में (श्रवयतं) ज्ञानगति बढ़ायें (आ) और (मे) हमारी (हवा, इमा) इन प्राणापानरूप आहुतियों को (श्रुतं) प्रवाहित करें ।।

भावार्थ—मनुष्य की स्वाभाविक गति इस ओर होती है कि वह अपने मन, प्राण तथा इन्द्रियों को संबोधन करके कुछ कथन करे, साहित्य में इसको स्वभावोक्ति—अलंकार और दार्शनिकों की परिभाषा में उपचार कहते हैं, यहाँ पूर्वोक्त अलंकार से प्राणापान को संबोधन करके यह कथन किया है कि प्राणायाम द्वारा हमारी इन्द्रियों में इस प्रकार का बल उत्पन्न हो जिससे वह सन्मार्ग से कभी च्युत न हों अर्थात् अपने संयम में तत्पर रहें, और इनको "युवाना" विशेषण इसलिए दिया है कि जिस प्रकार अन्य शारीरिक तत्त्व वृद्धावस्था में जाकर जीर्ण हो जाते हैं, इस प्रकार प्राणों में कोई विकार उत्पन्न नहीं होता, नित्य नूतन रहने के कारण इनको "युवा" कहा गया है ।।५।।

नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधन्तु ।
सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥६॥

नु । मित्रः । वरुणः । अर्यमा । नः । त्मने । तोकाय । वरिवः । दधन्तु । सुऽगा । नः । विश्वा । सुऽपथानि । सन्तु । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

पदार्थः—(नु) निश्चयेन (मित्रः) अध्यापकः (वरुणः) उपदेशकश्च (अर्यमा) न्यायकारी=विद्वान्, एते सर्वे विद्वांसः (नः) अस्माकं (त्मने) आत्मने (तोकाय) सन्तानाय च (वरिवः) ऐश्वर्य्यं दधन्तु प्रयच्छन्तु, अन्यच्च (नः) अस्माकं (विश्वा, सुपथानि) सर्वे पन्थानः (सुगाः) कल्याणरूपाः(सन्तु) भवन्तु, हे अध्यापकोपदेशकगण! (यूयं) भवन्त इत्यर्थः, (स्वस्तिभिः) स्वस्तिवाचनादिभिः (नः) अस्मान् (सदा) सर्वदा (पात) रक्षत ।।

पदार्थ—(नु) निश्चय करके (मित्रः) अध्यापक (वरुणः) उपदेशक (अर्यमा) न्यायकारी ये सब विद्वान् (नः) हमारे (त्मने) आत्मा के लिए और (तोकाय) सन्तान के लिए (वरिवः) ऐश्वर्य्य को (दधन्तु) दें और (नः) हमारे (विश्वाः) सम्पूर्ण (सुपथानि) मार्ग (सुगाः) कल्याणरूप सन्तु हों, और (यूयं) आप (स्वस्तिभिः) स्वस्तिवाचन आदि वाणियों से (नः) हमारी (सदा) सर्वदा (पात) रक्षा करें ।।

भावार्थ—अध्यापक उपदेशक तथा अन्य अन्य विषयों के ज्ञाता विद्वानों को यजमान लोग अपने अपने यज्ञों में बुलायें और सम्मानपूर्वक उनसे कहें कि हे विद्वद्गण ! आप हमारे कल्याणार्थ स्वस्तिवाचनादि वाणियों से प्रार्थना करें और हमारे लिए कल्याणरूप मार्गों का उपदेश करें ।।६।।

अथ त्रयष्षष्टितमस्य षड्ऋचस्य सूक्तस्य—

।।६३।। १–६ वसिष्ठः ऋषिः ।। १–४, ५ सूर्यः । ५, ६ मित्रावरुणौ देवते ।।
छन्दः–१, ६ विराट् त्रिष्टुप् । २–५ निचृत्त्रिष्टुप् ।
धैवतः स्वरः ।।

अथ प्राणायामादिसंयमैर्ध्येयस्य परमात्मनो ध्यानमुपदिश्यते—

अब प्राणायामादि संयमों द्वारा ध्येय परमात्मा का वर्णन करते हैं—

उद्वे॑ति सु॒भगो॑ वि॒श्वच॑क्षाः साधा॑रणः सूर्यो॒ मानु॑षाणाम् ।
चक्षु॑र्मि॒त्रस्य॒ वरु॑णस्य दे॒वश्चर्मे॑व यः स॒मवि॑व्य॒क्तमां॑सि ॥ १ ॥

उत् । ऊँ इति॑ । ए॒ति । सु॒ऽभगः॑ । वि॒श्वऽच॑क्षाः । साधा॑रणः । सूर्यः॑ । मानु॑षाणाम् । चक्षुः॑ । मि॒त्रस्य॑ । वरु॑णस्य । दे॒वः । चर्म॑ऽइव । यः । सं॒ऽअवि॑व्यक् । तमां॑सि ॥ १ ॥

पदार्थः—(यः, देवः) यः ज्योतिःस्वरूपः परमात्मा (मित्रस्य, वरुणस्य) अध्यापकोपदेशकयोः (चक्षुः) नेत्रम् अस्ति अन्यच्च यः (तमांसि) अज्ञानानि (चर्म, इव) तृणानीव (सं) सम्यक्तया (अविव्यक्) नाशयति, स एव (मानुषाणां) सर्वमनुजानां (साधारणः) सामान्यरूपेण (सूर्यः) प्रकाशकः (विश्वचक्षाः) सर्वद्रष्टा (सुभगः) ऐश्वर्यसंपन्नोऽस्ति, स परमात्मा प्राणायामादिसंयमैः (उद्वेति) प्रकटीभवति ॥

पदार्थ—(यः, देवः) जो दिव्यरूप परमात्मा (मित्रस्य, वरुणस्य) अध्यापक तथा उपदेशकों को (चक्षुः) मार्ग दिखलानेवाला और जो (तमांसि) अज्ञानों को (चर्म, इव) तुच्छ तृणों के समान (सं) भले प्रकार (अविव्यक्) नाश करता है, वही (मानुषाणां) सब मनुष्यों का (साधारणः) सामान्यरूप से (सूर्यः) प्रकाशक, (विश्वचक्षाः) सर्वद्रष्टा और (सुभगः) ऐश्वर्य्यसम्पन्न है, वह परमात्मदेव प्राणायामादि संयमों से (उद्वेति) प्रकाशित होता है ॥

भावार्थ—परमात्मदेव ही अध्यापक तथा उपदेशकों को सन्मार्ग दिखलानेवाला, सब प्रकार के अज्ञानों का नाशक है, वह सर्वद्रष्टा, सर्वप्रकाशक तथा सर्वऐश्वर्य्यसम्पन्न परमात्मा प्राणायामादि संयमों द्वारा हमारे हृदय में प्रकाशित होता है, इसी भाव को **"चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य"** यजु० ७।४२॥ में प्रतिपादन किया है कि वही परमात्मा सबका प्रकाशक और सन्मार्ग दिखलानेवाला है, "साधारणः" शब्द सामान्यभाव से सर्वत्र व्याप्त होने के अभिप्राय से आया है जिसका अर्थ ऊपर स्पष्ट है ॥१॥

उद्वे॑ति प्रस॒वीता जना॑नां म॒हान्के॒तुर॑र्ण॒वः सूर्य॑स्य ।
स॒मा॒नं च॒क्रं प॑र्या॒विवृ॑त्स॒न्यदे॑त॒शो वह॑ति धू॒र्षु यु॒क्तः ॥ २ ॥

उ॒त् । ऊँ इति॑ । ए॒ति । प्र॒ऽस॒वि॒ता । जना॑नां । म॒हान् । के॒तुः । अ॒र्ण॒वः । सूर्य॑स्य । स॒मा॒नं । च॒क्रं । प॒रि॒ऽआ॒वि॒वृ॑त्सन् । यत् । ए॒त॒शः । वह॑ति । धूः॒ऽसु । यु॒क्तः ॥ २ ॥

पदार्थः—स परमात्मा (जनानाम्) सर्वप्राणिनां (प्रसविता) जनयिता (महान्) ब्रह्मरूपः (केतुः) ध्वजमिव सर्वोपरि विराजमान, (अर्णवः) अन्तरिक्षस्य (सूर्यस्य) सूर्यमण्डलस्य च यत् (समानं) एकं (चक्रं) मण्डलाकारं (पर्याविवृत् सन्) चालयितुमिच्छन् सन् (धूर्षु) एषां मध्यभागे (युक्तः) संलग्ना (यत्) या (एतशः) दिव्यशक्तिः (वहति) अनन्तब्रह्माण्डान् संचालयति, तस्याः स्वामी सर्वशक्तिमान् परमात्मदेवः (उद्वेति) संयमिनां दमिनां जनानामन्तःकरणेषु भक्तियोगेन आविर्भवतीत्यर्थः ॥

पदार्थ—वह परमात्मा (जनानां) सब मनुष्यों का (प्रसविता) उत्पादक (महान्) सबसे बड़ा (केतुः) सर्वोपरि विराजमान (अर्णवः) अन्तरिक्ष तथा (सूर्यस्य) सूर्य्य के (समानं, चक्रं,

परि, आविवृत्सन्) समान चक्र को एक परिधि में रखनेवाला है (धूर्षु) इनके धुराओं में (युक्तः) युक्त हुई (यत्) जो (एतशः) दिव्यशक्ति (वहति) अनन्त ब्रह्माण्डों का चालन कर रही है, वह सर्वशक्तिरूप परमात्मा (उद्वेति) संयमी पुरुषों के हृदय में प्रकाशित होता है ॥

भावार्थ—इस मन्त्र में परमात्मा को सर्वोपरि वर्णन करते हुए यह वर्णन किया है कि सबका स्वामी परमात्मा जो सम्राट् के केतु झण्डे के समान सर्वोपरि विराजमान है, वह सूर्य्य, चन्द्रमा, पृथिवी तथा अन्तरिक्ष आदि कोटि कोटि ब्रह्माण्डों को रथ के चक्र समान अपनी धुराओं पर घुमाता हुआ सबको अपने नियम में चला रहा है उस परमात्मा को संयमी पुरुष ध्यान द्वारा प्राप्त करते हैं ॥

जो लोग वेदमन्त्रों को सूर्यादि जड़ पदार्थों के उपासन तथा वर्णन में लगाते हैं उनको इस मन्त्र के "सूर्य्यस्य" पद से यह अर्थ सीख लेना चाहिए कि वेद सूर्य्य के भी सूर्य्य को सूर्य्य नाम से कहता है, इसी अभिप्राय से इस सूक्त के प्रथम मन्त्र में परमात्मा को मनुष्यों का सूर्य्य और इस मन्त्र में उसको भौतिक सूर्य्य का चलानेवाला कहा है, इसी भाव को लेकर केनोपनिषद् १।२। में **"चक्षुषश्चक्षुः"** उसको चक्षु का भी चक्षु कथन किया है अर्थात् वह परमात्मा सूर्य्य का सूर्य्य, प्राण का प्राण तथा चक्षु का चक्षु है, या यों कहो कि सूर्य्य, प्राण और चक्षु आदि अनन्त नामों से उसीका वर्णन किया गया है, इसलिए परस्पर विरोध नहीं ॥२॥

विभ्राजमान उषसामुपस्थाद्रेभैरुदेत्यनुमद्यमानः ।
एष मे देवः सविता चच्छन्द यः समानं न प्रमिनाति धाम ॥ ३ ॥

विऽभ्राजमानः । उषसाम् । उपऽस्थात् । रेभैः । उत् । एति । अनुऽमद्यमानः । एषः । मे । देवः । सविता । चच्छन्द । यः । समानम् । न । प्रऽमिनाति । धाम । ॥ ३ ॥

पदार्थः—(विभ्राजमानः) सर्वप्रकाशकः परमात्मा (उषसां) प्रकाशितपदार्थानां मध्ये (उपस्थात्) स्थितत्वाद्धेतोः (रेभैः) स्तुतिकारकैरुद्गात्रादिभिः (अनुमद्यमानः) उपगीयमानः (उदेति) प्रकाशते (एषः) असौ (सविता) सर्वोत्पादकः (देवः) परमात्मा (मे) मम कामनां (चच्छन्द) पूरयति, अन्यच्च (यः) परमात्मा (नूनं) निश्चयेन (धाम) अखिलस्थानं (समानं) समानरूपेण (प्रमिनाति) जानातीत्यर्थः ॥

पदार्थ—(विभ्राजमानः) वह प्रकाशस्वरूप परमात्मा (उषसां) सब प्रकाशित पदार्थों में (उपस्थात्) स्थिर होने से (रेभैः) उद्गात्रादि स्तोतृपुरुषों द्वारा (अनुमद्यमानः) गान किया हुआ (उदेति) प्रकाशित होता है (एषः) यह (सविता) सबका उत्पन्न करनेवाला (देवः) परमात्मा (मे) मेरी कामनाओं को (चच्छन्द) पूर्ण करता है और (यः) वह (नूनं) निश्चय करके (धाम) सब स्थानों को (समानं) समानरूप से (प्रमिनाति) जानता है अर्थात् न किसी से उसका राग और न किसी से द्वेष है ॥

भावार्थ—भाव यह है कि वह परमात्मदेव प्रत्येक मनुष्य के हृदयरूपी धाम को समान-भाव से जानता है उसमें न्यूनाधिक भाव नहीं अर्थात् वह पक्षपात किसी के साथ नहीं करता, परमात्मभावों को अपने हृदयगत करना ही उसके प्रकाश होने का साधन है, वही सब ज्योतियों

का ज्योति, सर्वोपरि विराजमान और वही सबका उपास्यदेव है, उसी की उपासना करनी चाहिये, अन्य की नहीं ।।३।।

दिवो रुक्म उरुचक्षा उदेति दूरेअर्थस्तरणिर्भ्राजमानः ।
नूनं जनाः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि ॥ ४ ॥

दिवः । रुक्मः । उरुऽचक्षाः । उत् । एति । दूरेऽअर्थः । तरणिः । भ्राजमानः । नूनं । जनाः । सूर्येण । प्रऽसूताः । अयन् । अर्थानि । कृणवन् । अपांसि ॥ ४ ॥

पदार्थः—(तरणिः) सर्वस्व तारकः (भ्राजमानः) प्रकाशस्वरूपः (दूरेअर्थः) सर्वत्र परिपूर्णः (दिवः) द्युलोकस्य (रुक्म) प्रकाशकः (उरुचक्षाः) सर्वद्रष्टा, एवंविधः परमात्मा तेषां हृदये (उदेति) आविर्भवति, (जनाः) ये मनुष्याः (नूनं) निश्चयेन (सूर्येण) परमात्मोपदिष्टेन मार्गेण (अयन्) गच्छन्तः (प्रसूताः) प्रेरिताः (अर्थानि) अनुष्ठेयानि (अपांसि) कर्माणि (कृणवन्) कुर्वन्ति ।।

पदार्थ—(तरणिः) सब का तारक (भ्राजमानः) प्रकाशस्वरूप (दूरेअर्थः) सर्वत्र परिपूर्ण (दिवः, रुक्म) द्युलोक का प्रकाशक (उरुचक्षाः) सर्वद्रष्टा परमात्मा उन लोगों के हृदय में (उदेति) उदय होता है जो (जनाः) पुरुष (नूनं) निश्चय करके (सूर्येण) परमात्मा के बतलाये हुए (अयन्) मार्गों पर चलते हुए (प्रसूताः) नूतन जन्मवाले (अर्थानि) सार्थक (अपांसि) कर्म (कृणवन्) करते हैं ।।

भावार्थ—परमात्मा उपदेश करते हैं कि हे पुरुषो ! सन्मार्ग दिखलानेवाला प्रकाशस्वरूप परमात्मा सर्वत्र परिपूर्ण और चमकते हुए द्युलोक का भी प्रकाशक है, वह स्वतःप्रकाश प्रभु उन पुरुषों के हृदय में प्रकाशित होता है जो उसकी आज्ञा का पालन करते और वेदविहित कर्म करके सफलता को प्राप्त होते हैं ।।

तात्पर्य यह है कि यावदायुष वेदविहित कर्म करनेवाले सत्कर्मी पुरुषों के हृदय में परमात्मा का प्रकाश होता है, निरुद्यमी, आलसी तथा अज्ञानियों के हृदय में नहीं, इसी भाव को **"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳसमाः"** यजु० ४०।२।। इस मन्त्र में निरूपण किया है कि वेदविहित कर्म करते हुए ही सौ वर्ष जीने की इच्छा करो ।।४।।

यत्रा चक्रुरमृता गातुमस्मै श्येनो न दीयन्नन्वेति पाथः ।
प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः ॥ ५ ॥

यत्र । चक्रुः । अमृताः । गातुं । अस्मै । श्येनः । न । दीयन् । अनु । एति । पाथः । प्रति । वां । सूरे । उत्ऽइते । विधेम । नमःऽभिः । मित्रावरुणा । उत । हव्यैः ॥ ५ ॥

पदार्थः—परमात्मोपदिशति—(मित्रावरुणा) हे अध्यापकोपदेशकौ ! (वां) युवयोः कृपया (नमोभिः) नमस्कारैः (उदिते, सूरे) उषाकाले परमात्मोपासनां (विधेम) करवाम, परमात्मा (श्येनो, न) विद्युदिव (दीयन्) शीघ्रमेव गच्छन्

(पाथ:) पन्थानं (अन्वेति) गत:, अन्यच्च यं (गातुं) गन्तुं (अमृता:) मुक्तपुरुषा मुक्ति साधनानि (चक्रु:) कृतवन्त:, अन्यच्च (अस्मै) अस्य प्राप्तये (प्रति) प्रतिदिनं सन्ध्या-वेलायामुपासनां (हव्यै:) हवनद्वारेण स्वस्वस्थानानि संमार्ज्य (उत) अथवा (यत्र) यस्मिन् स्थाने भवन्मन ईश्वरे संलग्नं भवेत् तत्रैवोपासनं करवामहै ।।

पदार्थ—परमात्मा उपदेश करते हैं कि (मित्रावरुण) हे अध्यापक तथा उपदेशको ! (वां) तुम्हारी कृपा से हम (नमोभि:) नम्रभावों से (उदिते, सूरे) सूर्य्य के उदय होने पर उस परमात्मा की (विधेम) उपासना करें, जो (श्येन:) विद्युत् की (न) समान गतिवाले पदार्थों की न्याईं (दीयन्) शीघ्र (पाथ:, अन्वेति) पहुँचा हुआ है और जिसको (गातुं) प्राप्त होने के लिये (अमृता:) मुक्त पुरुष (चक्रु:) मुक्ति के साधन करते हैं (अस्मै) उस स्वत:प्रकाश परमात्मा के लिये (वां) तुम लोग (प्रति) प्रतिदिन प्रात:काल उपासना करो (उत) और (हव्यै:) हवन द्वारा अपने स्थानों को पवित्र करके (यत्र) जिस जगह मन प्रसन्न हो वहाँ प्रार्थना करो ।।

भावार्थ—परमात्मा अध्यापक तथा उपदेशकों को आज्ञा देते हैं कि तुम लोग प्रात:काल उस स्वयं ज्योति:प्रकाश की उपासना करो जो विद्युत् के समान सर्वत्र परिपूर्ण है और जिस ज्योति की प्राप्ति के लिये मुक्त पुरुष अनेक उपाय करते रहे हैं, तुम लोग उस स्वयंप्रकाश परमात्मा की प्रतिदिन उपासना करो अर्थात् प्रात:काल ब्रह्मयज्ञ तथा देवयज्ञ करके ध्यान द्वारा उसको सत्कृत करो ।।

परमात्मा के लिये जो यहां **"श्येन:"** की उपमा दी है वह उसके सर्वत्र परिपूर्ण होने के अभिप्राय से है, शीघ्रगामी होने के अभिप्राय से नहीं, निरुक्त एकादश अध्याय में श्येन के अर्थ इन्द्र किये हैं और इन्द्र तथा विद्युत् यह एकार्थवाची शब्द है, इसकी व्युत्पत्ति इस प्रकार है कि **"शंसनीयं गच्छतीति श्येन:"**=जो सर्वोपरि गतिशील हो उसका नाम "श्येन" है ।।

और जो कई एक लोग श्येन के अर्थ **"बाज"** पक्षी के करते हैं कि बाज बहुत शीघ्र एक स्थान से उड़कर स्थानान्तर को प्राप्त हो जाता है इसी प्रकार यह भौतिक सूर्य्य भी उसी की न्याईं शीघ्रगामी है, या यों कहो कि गृध्र=**"गिद्ध"** पक्षी के समान वेगवाला है, यह अर्थ सायणाचार्य्य ने किये हैं, हमारे विचार में ऐसे अर्थ करने ही से वेदों का महत्व लोगों के हृदय से उठ रहा है, जब निरुक्तकार ने श्येन के अर्थ स्पष्टतया इन्द्र के किये हैं तो फिर यहाँ गिद्ध तथा बाज आदि पक्षियों का ग्रहण करना कैसे संगत हो सकता है, इसी प्रकार निरुक्तादि प्राचीन वेदाङ्गों का आश्रय छोड़कर सायणादि भाष्यकारों ने अनेक स्थलों में भूल की है, जैसा कि इसी मन्त्र में **"सूर"** के अर्थ भौतिक सूर्य्य करके मन्त्रार्थ यह किया है कि इस भौतिक सूर्य्य के गमनार्थ देवताओं ने आकाश में सड़क बनाई है जिसमें वह श्येन तथा गृध्र से भी शीघ्र चलता है, इसलिये उसके उदय काल में नमस्कारों से उसकी वन्दना करनी चाहिए । इसका उत्तर यह है कि जब इसी सूक्त के दूसरे मन्त्र में उस शक्ति को इस भौतिक सूर्य्य का चालक कथन किया गया है और अनेक स्थलों में यह कथन किया गया है कि उसी शक्ति से यह सूर्य्य उत्पन्न होता है, जैसा कि **"चक्षो: सूर्यो अजायत"** ।। यजु० ३१।१२=उसी चक्षुरूप शक्ति से सूर्य्य उत्पन्न हुआ, फिर उक्त अर्थ के विरुद्ध यहाँ भौतिक सूर्य्य की उपासना सिद्ध करना वेदाशय से सर्वथा विरुद्ध है ।।५।।

नू मित्रो वरु॑णो अर्य॒मा न॒स्त्मने॒ तो॒काय॒ वरि॑वो दधन्तु ।
सु॒गा नो॒ विश्वा॑ सु॒पथा॑नि सन्तु यू॒यं पा॑त स्व॒स्तिभि॒: सदा॑ न:॥६॥

नु । मित्रः । वरुणः । अर्यमा । नः । त्मने । तोकाय । वरिवः । दधन्तु । सुऽगा । नः । विश्वा । सुऽपथानि । सन्तु । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

पदार्थः—(मित्रः) अध्यापकः (वरुणः) उपदेशकश्च (अर्यमा) न्यायकारी, विद्वान् एते सर्वे विद्वांसः (नः) अस्माकम् (त्मने) आत्मने (तोकाय) सन्तानाय च (वरिवः) धनम् **"वरिव इति धननामसु पठितम्"**॥ निरु० ३।९॥ (दधन्तु) प्रयच्छन्तु (नः) अस्माकम् (विश्वा) सर्वाणि (सुपथानि) मार्गाः (सुगा) सुखेन गन्तुं योग्याः (सन्तु) भवन्तु, हे अध्यापकोपदेशकगण ! (यूयं) भवन्तः (स्वस्तिभिः) (नः) अस्मान् (सदा) (पात) रक्षत ॥

इति त्रयष्षष्टितमं सूक्तं समाप्तम् ।

पदार्थ—(नु) निश्चय करके (मित्रः) सबका मित्र (वरुणः) वरणीय = सबका प्राप्य स्थान (अर्यमा) न्यायकारी परमात्मा (नः) हमारे (त्मने) आत्मा के (तोकाय) सुखप्राप्त्यर्थ (वरिवः) सब प्रकार का ऐश्वर्य्य दधन्तु धारण करायें अथवा अन्न धन आदि से सम्पन्न करें ताकि (विश्वा) सब (सुगा) मार्ग (नः) हमारे लिए (सुपथानि) सुमार्ग (सन्तु) हों और हे भगवन् ! (यूयं) आप (स्वस्तिभिः) कल्याणयुक्त वाणियों से (नः) हमको (सदा) सदा (पात) पवित्र करें ॥

भावार्थ—इस मन्त्र में परमात्मा से प्रार्थना है कि हे प्रभो ! आप हमारे लिए सर्वदा = सब काल में कल्याणदायक हों और आपकी कृपा से हमको सब ऐश्वर्य्य तथा सुखों की प्राप्ति हो, इस मन्त्र में जो मित्र, वरुण तथा अर्यमा शब्द आये हैं वह सब परमात्मा के नाम हैं, **"शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा"** ॥ यजु० ३६।९॥ में मित्रादि सब नाम परमात्मा के हैं ॥

प्रश्न—कहीं मित्र, वरुण के अर्थ अध्यापक तथा उपदेशक, कहीं प्राणवायु तथा उदानवायु और कहीं परमात्मा करते हो, आपके इस भिन्नार्थ करने में क्या हेतु ? इसका उत्तर यह है कि जैसे एक ही "ब्रह्म" शब्द कहीं वेद का वाचक, कहीं प्रकृति का वाचक, कहीं अन्न का और मुख्यतया परमात्मा का वाचक है, इसी प्रकार उपरोक्त नाम मुख्यतया ब्रह्म के प्रतिपादक हैं और गौणी वृत्ति से अध्यापक तथा उपदेशक आदि नामों में भी वर्त्तते हैं, इसी भाव को महर्षि व्यास ने **"स्याच्चैकस्य ब्रह्मशब्दवत्"** ॥ ब्र० सू० २।३।५॥ में यह वर्णन किया है कि एक ही शब्द प्रकरण भेद से ब्रह्म शब्द के समान नाना अर्थों का वाचक होता है, इसलिए कोई विरोध नहीं ॥६॥

६३वां सूक्त समाप्त हुआ ।

अथ पञ्चर्चस्य चतुष्षष्टितमस्य सूक्तस्य—

१—५ वसिष्ठ ऋषिः ॥ मित्रावरुणौ देवते ॥
छन्दः—१, २—४ त्रिष्टुप् । ५ विराट् त्रिष्टुप् ॥ धैवतः स्वरः ॥

अधुना राजसूययज्ञो निरूप्यते ।

अब राजसूययज्ञ का निरूपण करते हैं ।

दिवि क्षयन्ता रजसः पृथिव्यां प्र वां घृतस्य निर्णिजो ददीरन् ।
हव्यं नो मित्रो अर्यमा सुजातो राजा सुक्षत्रो वरुणो जुषन्त ॥ १ ॥

दिवि । क्षयन्ता । रजसः । पृथिव्यां । प्र । वां । घृतस्य । निःऽनिजः । ददीरन् । हव्यं । नः । मित्रः । अर्यमा । सुऽजातः । राजा । सुऽक्षत्रः । वरुणः । जुषन्त ॥ १ ॥

पदार्थः—परमात्मोपदिशति हे अध्यापकोपदेशकौ (दिवि क्षयन्ता) द्युलोकस्य स्वामिनौ भवन्तौ (पृथिव्यां) पृथिवीलोके (रजसः) पदार्थविद्याया वेत्तारौ भवन्तौ (प्र, वां) युवाभ्यां प्रेरिता राजानः (घृतस्य) प्रेमभावस्य (निर्णिजः) स्नेहम् (ददीरन्) प्रजाभ्यः प्रयच्छन्तु, अन्यच्च (नः) अस्माकम् (हव्यं) राजसूयाख्यं यज्ञं (मित्रः) सर्वप्रियः (अर्य्यमा) न्यायकारी (सुजातः) कुलीनः (राजा) दीप्तिमान् (सुक्षत्रः) क्षात्रधर्मवित् (वरुणः) वरणीयः एवं विधा राजानः राजसूयाख्यं यज्ञं (जुषन्त) सेवन्ताम् ॥

पदार्थ—(दिवि, क्षयन्ता) द्युलोक में क्षमता रखनेवाले (पृथिव्याम्) पृथिवी लोक में क्षमता रखनेवाले (रजसः) राजस भावों के जाननेवाले अध्यापक तथा उपदेशक राजा तथा प्रजा को सदुपदेशों द्वारा सुशिक्षित करें और (प्र, वां) उन अध्यापक तथा उपदेशकों के लिए प्रजा तथा राजा लोग (घृतस्य, निर्णिजः) प्रेमभाव का (ददीरन्) दान दें और (नः) हमारे (हव्यं) राजसूय यज्ञ को (मित्रः) सब के मित्र (अर्य्यमा) न्यायशील (सुजातः) कुलीन (सुक्षत्रः) क्षात्रधर्म के जाननेवाले (वरुणः) सब को आश्रयण करने योग्य राजा लोग (जुषन्त) सेवन करें ।

भावार्थ—परमात्मा उपदेश करते हैं कि हे मनुष्यो ! तुम द्युलोक तथा पृथिवी लोक की विद्या जाननेवाले अध्यापक तथा उपदेशकों में प्रेम-भाव धारण करो और राजसूय यज्ञ के रचयिता जो क्षत्री लोग हैं उनका प्रीति से सेवन करो ताकि तुम्हारे राजा का पृथिवी तथा द्युलोक के मध्य में सर्वत्र ऐश्वर्य्य विस्तृत हो जिससे तुम सांसारिक अभ्युदय को प्राप्त होकर सुखपूर्वक जीवन व्यतीत करो अर्थात् जो सब का मित्र न्यायकारी कुलीन और जो डाकू चोर तथा अन्यायकारियों के दुःखों से छुड़ानेवाला हो ऐसे राजा की प्रेमलता को अपने स्नेह से सिञ्चन करो ॥१॥

आ राजाना मह ऋतस्य गोपा सिन्धुपती क्षत्रिया यातमर्वाक् ।
इळां नो मित्रावरुणोत वृष्टिमव दिव इन्वतं जीरदानू ॥ २ ॥

आ । राजाना । महः । ऋतस्य । गोपा । सिन्धुपती इति । सिन्धुऽपती । क्षत्रिया । यातं । अर्वाक् । इळां । नः । मित्रावरुणा । उत । वृष्टिं । अव । दिवः । इन्वतं । जीरदानू ॥ २ ॥

पदार्थः—(राजाना) हे प्रजापालकजनाः भवन्तः (महः, ऋतस्य) महतः सत्यस्य (गोपा) रक्षकाः (सिन्धुपती) सर्वसिन्धुप्रदेशानां पतयः (क्षत्रियाः) प्रजारक्षकाः

(अर्वाक्, यातं) शीघ्रमागत्य (नः) अस्माकम् (मित्रावरुणा) अध्यापकोपदेशकयोः (इळां, वृष्टि) अन्यसाधनस्य च पुष्टिद्वारेण (अव) रक्षन्तु भवन्तः, अन्यच्च (जीरदानू) शीघ्रमेव (दिवः) द्युलोकस्य ऐश्वर्य्येण (इन्वतं) वर्धयन्तु ॥

पदार्थ—(राजाना) हे राजा लोगो ! तुम (महः, ऋतस्य, गोपा) बड़े सत्य के रक्षक (सिन्धुपती) सम्पूर्ण सागर प्रदेशों के पति (आ) और (क्षत्रिया) सब प्रजा को दुःखों से बचानेवाले हो (अर्वाक्, यातं) तुम शीघ्र उद्यत होकर (नः) अपने (मित्रावरुणा) अध्यापक तथा उपदेशकों की (इळां वृष्टि) अन्न धन के द्वारा (अब) रक्षा करो (उत) और (जीरदानू) शीघ्र ही (दिवः) अपने ऐश्वर्य्य से (इन्वतं) इनको प्रसन्न करो ॥

भावार्थ—परमात्मा उपदेश करते हैं कि हे राजा लोगो ! तुम सदा सत्य का पालन करो और एक मात्र सत्य पर ही अपने राज्य का निर्भर रक्खो, सब प्रजावर्ग को दुःखों से बचाने का प्रयत्न करो और अपने देश में विद्याप्रचार तथा धर्मप्रचार करनेवाले विद्वानों का धनादि से सत्कार करो ताकि तुम्हारा ऐश्वर्य्य प्रतिदिन वृद्धि को प्राप्त हो ॥२॥

मित्रस्तन्नो वरुणो देवो अर्यः प्र साधिष्ठेभिः पथिभिर्नयन्तु ।
ब्रवद्यथा न आदरिः सुदासं इषा मदेम सह देवगोपाः ॥ ३ ॥

मित्रः । तत् । नः । वरुणः । देवः । अर्यः । प्र । साधिष्ठेभिः । पथिऽभिः । नयन्तु । ब्रवत् । यथा । नः । आत् । अरिः । सुदाऽसे । इषा । मदेम । सह । देवऽगोपाः ॥ ३ ॥

पदार्थः—हे राजानः भवन्तः (तत्) सः (मित्रः) अध्यापकः (वरुणः) उपदेशकश्च (अर्यः) न्यायाधीशः (देवः) विद्वान् इमे सर्वे (प्र, साधिष्ठेभिः) शुभसाधनवद्भिः (पथिभिः) मार्गैः (नन्तु) गमयन्तु, अन्यच्च (देवगोपाः) राजजनैः तथा प्रजाजनैः (सह) परस्परं मिलित्वा (इषा) ऐश्वर्येण (मदेम) हृष्येम, अन्यच्च (सुदासे) उत्तमदानाय (अरिः) अर्ति गच्छति यथातत्त्वं न्यायं करोतीति न्यायकारी परमात्मा (नः) अस्मान्प्रति (यथा) येन प्रकारेण (आत्) सदैव (ब्रवत्) उपदिशति एवं भवन्तः (नः) अस्मान्प्रति उपदिशन्तु ॥

पदार्थ—हे राजा तथा प्रजाजनो ! तुमको (तत्) वह (मित्रः) अध्यापक (वरुणः) उपदेशक (अर्यः) न्यायाधीश (देवः) विद्वान् (प्र, साधिष्ठेभिः पथिभिः) भले प्रकार शुभ साधनोंवाले मार्गों से (नयन्तु) ले जायं ताकि (सह, देवगोपाः) राजा तथा प्रजाजन साथ साथ (इषा, मदेम) ऐश्वर्य्य का सुख लाभ करें (सुदासे) उत्तम दान के लिए (अरिः) न्यायकारी परमात्मा (नः) हमको (यथा) जिस प्रकार (आत्) सदैव (ब्रवत्) उत्तम उपदेश करते हैं उसी प्रकार आप (नः) हमको उपदेश करें ॥

भावार्थ—परमात्मा उपदेश करते हैं कि हे राजा तथा प्रजाजनो ! तुम उस सर्वोपरि न्यायकारी परमात्मा की आज्ञा का यथावत् पालन करो जिससे तुम मनुष्य जन्म के फलचतुष्टय को प्राप्त कर सको, तुमको तुम्हारे अध्यापक, उपदेष्टा तथा न्यायाधीश सदैव उत्तम मार्गों से चलायें जिससे तुम्हारा ऐश्वर्य्य प्रतिदिन वृद्धि को प्राप्त हो ॥३॥

यो वां गर्तं मनसा तक्षदेतमूर्ध्वां धीतिं कृणवद्धारयच्च ।
उक्षेथां मित्रावरुणा घृतेन ता राजाना सुक्षितीस्तर्पयेथाम् ॥ ४ ॥

यः । वां । गर्तं । मनसा । तक्षत् । एतं । ऊर्ध्वां । धीतिं । कृणवत् । धारयत् । च । उक्षेथां । मित्रावरुणा । घृतेन । ता । राजाना । सुऽक्षितीः । तर्पयेथाम् ॥ ४ ॥

पदार्थः—(यः) ये राजानः (मित्रावरुणा) अध्यापकोपदेशकयोः (गतेन) स्नेहेन (उक्षेथां) सिञ्चन्ति (ता) ते (सुक्षितीः) सम्पूर्णप्राणिनः (तर्पयेथाम्) तर्पयन्ति, अपरं च ये (वां) अध्यापकोपदेशकयोः (गर्तं) गूढाशयम् (मनसा) चित्तवृत्त्या (तक्षत्) विचारयन्ति ते (एतं) पूर्वोक्तम् (ऊर्ध्वां, धीतिं) उन्नतकर्मरक्षाम् (धारयत्) धारणं कृत्वा (कृणवत्) कुर्वन्ति ते सदैव उन्नतिपथं प्राप्नुवन्ति ॥

पदार्थ—(यः) जो (राजाना) राजा लोग (मित्रावरुणा) अध्यापक तथा उपदेशकों को (घृतेन) स्नेह से (उक्षेथां) सिञ्चन करते हैं (ताः) वह (सुक्षितीः) सम्पूर्ण प्रजा को (तर्पयेथां) तृप्त करते हैं (च) और जो (वां) अध्यापक तथा उपदेशकों के (गर्तं) गूढ़ाशयों का (मनसा) मन से (तक्षत्) विचार कर (एवं) उन (ऊर्ध्वां, धीतिं) उन्नत कर्मों को (धारयत्) धारण करके (कृणवत्) करते हैं वह सदैव उन्नत होते हैं ॥

भावार्थ—परमात्मा उपदेश करते हैं कि जो राजा लोग अपनी प्रजा में विद्या तथा धार्मिक भावों के प्रचारार्थ अध्यापक और बड़े बड़े विद्वान् धार्मिक उपदेशकों का अपने स्नेह से पालन पोषण करते हैं वह अपनी प्रजा को उन्नत करते हैं और जो प्रजाजन उक्त महात्माओं के उपदेशों को मन से विचार कर अनुष्ठान करते हैं वह कभी अवनति को प्राप्त नहीं होते प्रत्युत सदा उन्नति की ओर जाते हैं ॥४॥

एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि ।
अविष्टं धियो जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥ ६ ॥

एषः । स्तोमः । वरुण । मित्र । तुभ्यं । सोमः । शुक्रः । न । वायवे । अयामि । अविष्टं । धियः । जिगृतं । पुरंऽधीः । यूयं । पात । स्वस्तिऽभिः । सदा नः ॥ ५ ॥ ६ ॥

पदार्थः—(वरुण, मित्र) हे अध्यापकोपदेशकौ ! (तुभ्यं) भवदर्थम् (एषः, स्तोमः) अयं ब्रह्मयज्ञः (सोमः) साधुस्वभावस्य (शुक्रः) बलस्य च दाता भवतु अन्यच्च (वायवे, न) आदित्य इव (अयामि) प्रार्थये (धियः) भवद्बुद्धयः (अविष्टं) श्रेष्ठ-कर्मणि (जिगृतं) सदैव वर्तेरन् अन्यच्च भवन्तः (पुरंधीः) ऐश्वर्य्यम् प्राप्नुयुः (यूयं) भवन्तः (नः) अस्मान्प्रति (सदा) सर्वदैव (स्वस्तिभिः) स्वस्तिवाचनादिवाग्भिः (पात) रक्षन्तु ॥

इति चतुष्षष्टितमं सूक्तं षष्ठो वर्गश्च समाप्तः ॥

पदार्थ—(मित्र, वरुण) हे अध्यापक तथा उपदेशको ! (तुभ्यं) तुम्हारे लिये (एषः, स्तोमः) यह विद्यारूपी यज्ञ (सोमः, शुक्रः) शील तथा बल के देनेवाला हो और तुम्हें (वायवे, न, अयामि) आदित्य के समान प्रकाशित करे (धियः) तुम्हारी बुद्धि (अविष्टं) श्रेष्ठ कर्मों में (जिगृतं) सदा वर्त्ते जिससे तुम (पुरंधीः) ऐश्वर्य्यशाली होओ (यूयं) तुम लोग (सदा) सर्वदा (स्वस्तिभिः) स्वस्तिवाचनादि वाणियों से (नः) हमको (पात) पवित्र करो, ऐसा कथन किया करें ॥

भावार्थ—परमात्मा उपदेश करते हैं कि हे विद्वानो ! यह विद्यारूपी यज्ञ तुम्हारे लिए बल तथा प्रकाश देनेवाला हो और यह यज्ञ तुम्हारे सम्पूर्ण कर्मों को सफल करे, तुम्हारी बुद्धियें सदा उत्तम कर्मों में प्रवृत्त रहें, तुम इस यज्ञ की पूर्णाहुति में सदा यह प्रार्थना किया करो कि परमात्मा मंगलमय भावों से सदैव हमको पवित्र करे ॥५॥

६४ वां सूक्त और छठवां वर्ग समाप्त हुआ ।

अथ पञ्चर्चस्य पञ्चषष्टितमस्य सूक्तस्य—
१—५ वसिष्ठ ऋषिः ॥ मित्रावरुणौ देवते ॥
छन्दः—१, ५ विराट् । २ त्रिष्टुप् ।
३, ४ निचृत्त्रिष्टुप् ॥ धैवतः स्वरः ॥

अथ प्रातः सूर्य्योदयसमये परमात्मानं वर्णयन्त ऐश्वर्य्यं प्रार्थयन्ते ।

अब प्रातःकाल सूर्योदय समय परमात्मा का उपासन कथन करते हुए उससे ऐश्वर्य्यप्राप्ति की प्रार्थना करते हैं—

अथ सूर्य्योदये परमात्मोपासनं कथ्यते—

॥ अब सूर्योदय समय में परमात्मा का उपासन कहते हैं ॥

प्रति॑ वां॒ सूर॒ उदि॑ते सू॒क्तैर्मि॒त्रं हु॑वे॒ वरु॑णं पू॒तद॑क्षम् ।
ययो॑रसु॒र्य१॒॑मक्षि॑तं॒ ज्येष्ठं॒ विश्व॑स्य॒ याम॑न्ना॒चिता॑ जिग॒त्नु ॥ १ ॥

प्रति॑ । वां॒ । सूरे॑ । उत्ऽइ॑ते । सु॒ऽउ॒क्तैः । मि॒त्रं । हु॒वे॒ । वरु॑णं । पू॒तऽद॑क्षं । ययोः॑ । अ॒सु॒र्य॑ं । अक्षि॑तं । ज्येष्ठं॑ । विश्व॑स्य । याम॑न् । आ॒ऽचि॒ता॑ । जि॒ग॒त्नु ॥१॥

पदार्थः—(सूरे, उदिते) सूर्य्योदयसमये (मित्रं) सर्वमित्रं परमात्मानम् (वरुणं) सर्वैः सेवनीयम् (पूतदक्षं) पवित्रनीतिम् एवंविधं परमात्मानम् (सूक्तैः) मन्त्रसमूहैः अहं सर्वदा (हुवे) आह्वये तथा च (वां) अध्यापकोपदेशकयोः शिक्षालाभार्थं आह्वानं करोमीत्यर्थः, (ययोः) अध्यापकोपदेशकयो राजा तथा प्रजा आह्वानं करोति अन्यच्च (अक्षितं) क्षयरहितम् (असुर्यं) अपरिमितबलसंयुक्तम् (ज्येष्ठं) सर्वोपरि-विराजमानम् (विश्वस्य, यामन्) सम्पूर्णयुद्धजेतारम् आह्वयामि (आचिता) बृहद्युद्ध-

विज्ञानवन्तौ यौ अध्यापकोपदेशकौ तयोराह्वानं कार्य्यम् इति शेषः य एवं करोति स संग्रामे शत्रुसङ्घस्य (जिगत्नुः) जेता भवति ।।

पदार्थ—(वां) हे राजा तथा प्रजाजनसमुदाय ! तुम सब (सूरे, उदिते) सूर्योदय काल में (मित्रं) सबका मित्र (वरुणं) सबका उपासनीय (पूतदक्षं) पवित्र नीतिवाले परमात्मा के (प्रति) समक्ष (सूक्तैः) मन्त्रों द्वारा (हुवे) उपासना करो (ययोः) जो उपासक राजा तथा प्रजाजन (अक्षितं, असुर्यं) अपरिमित बलवाले (ज्येष्ठं) सब से बड़े (विश्वस्य, यामन्) संसार भर के संग्रामों में (आचिता) वृद्धिवाले देव की उपासना करते हैं वह (जिगत्नु) अपने शत्रुओं को संग्रामों में जीत लेते हैं ।।

भावार्थ—परमात्मा उपदेश करते हैं कि हे पुरुषो ! तुम सब सूर्योदयकाल में वेद मन्त्रों द्वारा सर्वपूज्य परमात्मा की उपासना करो जिससे तुम्हें अक्षत बल तथा मनोवाञ्छित फल की प्राप्ति होगी और तुम संग्राम में अपने शत्रुओं पर विजय प्राप्त करोगे । यहां द्विवचन से राजा तथा प्रजा दोनों का ग्रहण है अर्थात् राजा और प्रजा दोनों उपासनाकाल में प्रार्थना करें कि हे भगवन् ! आप हमको अक्षत बल प्रदान करें जिससे हम अपने शत्रुओं को जीत सकें ।।

इस मन्त्र में सूर्योदय समय संध्या तथा उपासना का विधान स्पष्ट पाये जाने से सबका परम कर्तव्य है कि सूर्योदय समय ब्राह्म मुहूर्त्त में परमात्मा की उपासना करें जिससे बुद्धि, बल तथा सब प्रकार का ऐश्वर्य्य प्राप्त हो ।।१।।

ता हि देवानामसुरा तावर्या ता नः क्षितीः करतमूर्जयन्तीः ।
अश्याम मित्रावरुणा वयं वां द्यावा च यत्र पीपयन्नहा च ॥ २ ॥

ता । हि । देवानां । असुरा । तौ । अर्या । ता । नः । क्षितीः । करतं । ऊर्जयन्तीः । अश्याम । मित्रावरुणा । वयं । वां । द्यावा । च । यत्र । पीपयन् । अहा । च ॥ २ ॥

पदार्थः—(हि) निश्चयेन (ता) राजा तथा प्रजा जनौ (देवानां) विदुषां मध्ये (असुरौ) बलवन्तौ भवतः (ता) (अर्या) श्रेष्ठौ भवतः (तौ) (नः) अस्माकम् (क्षितीः) पृथिवीम् (ऊर्जयन्तीः) वृद्धिसंयुक्ताः (करतं) कुरुतामित्यर्थः (मित्रावरुणा) हे अध्यापकोपदेशकौ (वयं) (वां) युवाम् (अश्याम) प्राप्नुयाम (द्यावा) द्यावापृथिव्यौ (यत्र) यस्मिन्विषये (पीपयन्) अस्मान्प्रति प्याययेतां (च) पुनः (अहा) अहोरात्राणि वर्धेरन् यत्र एवंविधा प्रार्थना भवति तत्रैव सर्वैश्वर्य्यमुत्पद्यते इति भावः ।।

पदार्थ—(हि) निश्चय करके (ता) वही (तौ) राजा तथा प्रजा (देवानां) देवों के मध्य (असुरा) बलवाले होते, (अर्या) वही श्रेष्ठ होते और (ता) वही (नः) हमारी (क्षितीः) पृथिवी को (ऊर्जयन्तीः करतं) उन्नत करते हैं जो (मित्रावरुणा) सब के मित्र तथा वरणीय परमात्मा की उपासना करते हुए यह प्रार्थना करते हैं कि (वयं) हम लोग (अश्याम) परमात्मपरायण हों (च) और (यत्र) जहाँ (वां) राजा प्रजा दोनों (अहा) प्रति दिन (पीपयन्) वृद्धि की प्रार्थना करते हैं वहाँ (द्यावा) द्युलोक तथा पृथिवी लोक दोनों का ऐश्वर्य्य प्राप्त होता है ।।

भावार्थ—परमात्मा उपदेश करते हैं कि हे मनुष्यो ! तुम प्रतिदिन परमात्मपरायण होने के लिए प्रयत्न करो, जो लोग प्रतिदिन परमात्मा से प्रार्थना करते हुए अपनी वृद्धि की इच्छा

करते हैं वह द्युलोक तथा पृथिवी लोक के ऐश्वर्य्य को प्राप्त होते हैं, इसलिए तुम सदैव अपनी वृद्धि के लिए प्रार्थना किया करो ॥२॥

ता भूरिपाशावनृतस्य सेतू दुरत्येतू रिपवे मर्त्याय ।
ऋतस्य मित्रावरुणा पथा वामपो न नावा दुरिता तरेम ॥ ३ ॥

ता । भूरिऽपाशौ । अनृतस्य । सेतू इति । दुरत्येतू इति दुःऽअत्येतू । रिपवे । मर्त्याय । ऋतस्य । मित्रावरुणा । पथा । वां । अपः । न । नावा । दुःऽइता । तरेम ॥ ३ ॥

पदार्थः—(ऋतस्य) सत्स्य (पथा) मार्गेण (मित्रावरुणा) शक्तिद्वयवान्परमात्मा सर्वस्य मित्रः सर्वस्य वरणीयश्च (वां) राजानं तथा प्रजाजनम् (नावा) नौकल्पसाधनैः (नः) अस्मान् (दुरत्येतू) तारयतु अन्यच्च (भूरिपाशौ) अनन्तबलयुक्तः (अनृतस्य सेतुः) सन्मर्य्यादित्यर्थः, तद्द्वारेण तद्भक्तः विघ्नौघं तरतीत्यर्थः इत्यत्र द्विवचनमतन्त्रम्, **'बहुलं छन्दसीति'** विधानात् अर्थात् छन्दसि द्विवचनस्थानेऽपि एकवचनं संपद्यतइत्यर्थः ॥

पदार्थ—(ऋतस्य) सत्य का (पथा) मार्ग जो (मित्रावरुणा) सबका मित्र तथा वरणीय परमात्मा है वह (वां) हम राजा प्रजा को (अपः) जल की (नावा) नौकाओं के (न) समान (दुरिता) पापों से (तरेम) तारे, वह परमात्मा (मर्त्याय) मरणधर्मा मनुष्यों के (रिपवे) रिपुओं के लिए (भूरिपाशौ) अनन्त बलयुक्त और (ता) पूर्वोक्त गुणोंवाले भक्तों के लिए (अनृतस्य) अनृत से तराने का (सेतु) पुल है जिसके द्वारा उसका भक्त सब प्रकार के विघ्नों से (दुरत्येतू) तर जाता है ॥

भावार्थ—परमात्मा उपदेश करते हैं कि हे मनुष्यो ! जल की नौकाओं के समान तुम्हारे तराने का एक मात्र साधन परमात्मा ही है, इसलिए तुम सेतु के समान उस पर विश्वास करके इस संसार रूप भवसागर को जिसमें रिपु आदि अनेक प्रकार के दुरित रूप नक्र और असत्यादि अनेक प्रकार के भंवर हैं, इन सब से बचकर पार होने के लिए तुम्हें एक मात्र जगदीश्वर का ही अवलम्बन करना चाहिए अन्य कोई साधन नहीं ॥३॥

आ नो मित्रावरुणा हव्यजुष्टिं घृतैर्गव्यूतिमुक्षतमिळाभिः ।
प्रति वामत्र वरमा जनाय पृणीतमुद्नो दिव्यस्य चारोः ॥ ४ ॥

आ । नः । मित्रावरुणा । हव्यऽजुष्टिं । घृतैः । गव्यूतिं । उक्षतं । इळाभिः । प्रति । वां । अत्र । वरं । आ । जनाय । पृणीतं । उद्नः । दिव्यस्य । चारोः । ॥ ४ ॥

पदार्थः—(मित्रावरुणा) हे सर्वप्रिय तथा सर्ववरणीय शक्तिमन्परमात्मन् (नः) अस्माकम् (हव्यजुष्टिं गव्यूतिं) यज्ञभूमिम् (आ) सम्यक्प्रकारेण (घृतैः, इळाभिः) घृतैस्तथा अन्नैश्च (उक्षतं) सिञ्चतम् (वां प्रति) युवां प्रति अत्र अस्मिँल्लोके (वरं) उत्कृष्टम्, कार्य्यकारिणः (नः) अस्मान्प्रति (उद्नः) स्नेहस्य भावम् (पृणीतं) प्रयच्छतु प्रत्यहं भवत इयमेव प्रार्थना यत् (दिव्यस्य चारोः) चरणशीलस्य द्युलोकस्य वयमव्याहतगतयो भवेम ॥

पदार्थ—(मित्रावरुणा) हे परमात्मन् ! (नः) हमारे (हव्यजुष्टिं गव्यूतिं) यज्ञ भूमि को (आ) भलीभाँति (घृतैः, इळाभिः) घृत तथा अन्नों से (उक्षतं) पूर्ण करें (वां) दोनों राजा प्रजा को (अत्र) यहां (वरं) श्रेष्ठ (आ) और (चारोः दिव्यस्य) चरणशील द्युलोकस्थ प्रदेशों के विचरनेवाले बनायें और (नः, जनाय) हम लोगों को (उद्नः) प्रेमभाव (पृणीतं) प्रदान करें, हमारी आप से (प्रति) प्रतिदिन यही प्रार्थना है ।।

भावार्थ—हे दिव्यशक्ति सम्पन्न परमात्मन् ! आप हमारी यज्ञभूमि को अन्न तथा स्निग्ध द्रव्यों से सदैव सिञ्चन करते रहें और हमको द्युलोकादि दिव्य स्थानों में विचरने के लिए उत्तम साधन प्रदान करें जिससे हम अव्याहतगति होकर आपके लोकलोकान्तरों में परिभ्रमण कर सकें, यह हमारी आप से प्रार्थना है ।।४।।

एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि ।
अविष्टं धियो जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥ ७ ॥

एषः । स्तोमः । वरुण । मित्र । तुभ्यं । सोमः । शुक्रः । न । वायवे । अयामि । अविष्टं । धियः । जिगृतं । पुरंऽधीः । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥ ७ ॥

पदार्थः—(वरुण, मित्र) हे वरणीय तथा सर्वप्रियतम परमात्मन् (एषः, स्तोमः) इमं विज्ञानयज्ञम् (तुभ्यं) भवदर्थम् (अयामि) समर्पयामि भवान् मह्यम् (सोमः) सौम्यस्वभावम् (शुक्रः) बलम् प्रयच्छतु अन्यच्च (वायवे, न) आदित्यवत् प्रकाशम्प्रार्थयामि अस्माकम् (धियः) कर्म्माणि (अविष्टं) रक्षतु अस्माकम् (पुरंधीः) स्तुतीः (जिगृतं) स्वीकरोतु (यूयं) भवान् (स्वस्तिभिः) स्वस्तिवाचनवचोभिः (नः) अस्मान्प्रति (सदा) सदैव (पात) रक्षतु ।।

यूयं पात इत्यादि बहुवचनमादरार्थम्, ईश्वरे बहुत्वाभावात्, अर्थात् ईश्वरे नानात्वं नास्ति अतो बहुवचनमपि एकत्वसूचकमित्यर्थः ।।

पञ्चषष्टितमं सूक्तं सप्तमो वर्गश्च समाप्तः ।

पदार्थ—(वरुण, मित्र) हे वरणीय सथा सबके प्रियतम परमात्मन् ! (एषः, स्तोमः) यह विज्ञानमय यज्ञ (तुभ्यं) तुम्हारे निमित्त (अयामि) किया गया है, आप हमें (सोमः) सौम्य-स्वभाव (शुक्रः) बल (वायवे, न) आदित्य के समान प्रकाश (अयामि) प्रदान करें, यह यज्ञ (धियः, अविष्टं) बुद्धि की रक्षा (जिगृतं) जागृति (पुरंधीः) स्तुत्यर्थ है (यूयं) आप (स्वस्तिभिः) कल्याणकारक पदार्थों के प्रदान द्वारा (नः) हमको (सदा) सदा (पात) पवित्र करें ।।

भावार्थ—इस विज्ञानमय यज्ञ में स्नेह तथा आकर्षणरूप शक्ति प्रधान परमात्मा से यह प्रार्थना की गयी है कि हे भगवन् ! आप हमें सौम्यस्वभाव, बलिष्ठ तथा आदित्य के समान तेजस्वी बनायें और हमारी बुद्धि की सब ओर से रक्षा करें ताकि हम सदा प्रबुद्ध और अपने उद्योगों में तत्पर रहें, आपसे यही प्रार्थना है कि आप सदैव हम पर कृपा करते रहें ।।७।।

६५ वां सूक्त और सातवां वर्ग समाप्त हुआ ।

अथैकोनविंशत्यृचस्य षट्षष्टितमस्य सूक्तस्य—

१—१९ वसिष्ठ ऋषिः ॥ १—३, १७—१९ मित्रावरुणौ । ४—१३ आदित्याः । १४—१६ सूर्यो देवताः ॥ छन्दः—१, २, ४, ९ निचृद्गायत्री । ३ विराड्गायत्री । ५—७, १८, १९ आर्षीगायत्री । ८ स्वराड्-गायत्री । १० निचृद्बृहती । ११ स्वराड्बृहती । १२ आर्ची स्वराड्बृहती । १३, १५ आर्षीभुरिग्बृहती । १४ आर्षीविराड्बृहती । १६ पुर उष्णिक् । १७ पादनिचृद्-गायत्री ॥ स्वरः-१—९, १७—१९ षड्जः । १०—१५ मध्यमः । १६ ऋषभः ॥

अथ विज्ञानमयो यज्ञः प्रकारान्तरेण वर्ण्यते—

अब पूर्वोक्त विज्ञान यज्ञ को प्रकारान्तर से वर्णन करते हैं:—

प्र मित्रयोर्वरुणयोः स्तोमो न एतु शूष्यः ।
नमस्वान्तुविजातयोः ॥ १ ॥

प्र । मित्रयोः । वरुणयोः । स्तोमः । नः । एतु । शूष्यः । नमस्वान् । तुविऽजातयोः ॥ १ ॥

पदार्थः—(मित्रयोः, वरुणयोः) हे प्रेममय सर्वाधार परमात्मन् ! (नः) अस्माकम् (प्र, स्तोमः) एष विस्तृतो यज्ञः (शूष्यः) विविध=सुखकरः (एतु) भवतु (तु) अथ च (विजातयोः) हे जन्ममरणरहित भगवन्, अयं यज्ञः (नमस्वान्) अन्न-बाहुल्ययुक्तः स्यात् ॥

पदार्थ—(मित्रयोः, वरुणयोः,) हे प्रेममय सर्वाधार परमात्मन् (नः) हमारा (प्र, स्तोमः) यह विस्तृत विज्ञान यज्ञ (शूष्यः) सब प्रकार की वृद्धि करनेवाला (एतु) हो (तु) और (विजातयोः) हे जन्म, मरण से रहित भगवन् ! यह (नमस्वान्) वृहदन्न से सम्पन्न हो ॥

पदार्थः—(इन्द्रावरुणा) भो राजपुरुषाः ! यूयम् (अस्य, मदे) अस्मिन् राज्यप्रभुत्वे (धियः, पिन्वतम्) स्वमात्मानं कर्मयोगेण पोषयत (अनु) तत्पश्चात् (ओजसा) स्वतेजसा (अपां, खानि) शत्रूणां जलदुर्गाणि (आ, अतृन्तम्) सम्यक् विमर्द्य (दिवि, प्रभुम्) दिनाधिपं (सूर्यं) सूर्यं (ऐरयतम्) स्वधूम्रशरैराच्छाद्य (मायिनः) मायाविनः (अपितः) सर्वतः (अपिन्वतम्) पराजयत ॥

पदार्थ—(इन्द्रावरुणा) हे राजपुरुषो ! तुम (अस्य, मदे) इस राज्यप्रभुत्व में (धियः, पिन्वतं) अपने आपको कर्मयोग से पुष्ट करो (अनु) तदनन्तर (ओजसा) अपने तेज से (अपां,

ानि) शत्रु के जलदुर्गों को (आ, अतृन्तं) भले प्रकार नष्ट भ्रष्ट करके (दिवि, प्रभुं) दिन के प्रभु (सूर्य्यं) सूर्य को (ऐरयतं) अपने धूम्रवाणों से आच्छादन कर (मायिनः) मायावी शत्रुओं को (अपितः) सब ओर से (अपिन्वतं) परास्त करो ॥

भावार्थ—परमात्मा उपदेश करते हैं कि हे राजपुरुषो! तुम अपने उग्र कर्मों द्वारा शक्ति-सम्पन्न होकर मायावी शत्रुओं का मर्दन करो अर्थात् प्रथम अपनी जलयन्त्रविद्या द्वारा उनके जलदुर्गों को विजय करो तदनन्तर अपनी पदार्थ विद्या से सूर्य्य के तेज को आच्छादन करके अर्थात् यन्त्रों द्वारा दिन को रात्रि बनाकर शत्रुओं पर विजय करो, जो संसार में न्याय का भङ्ग करते हुए अपनी माया से प्रजाओं में नाना प्रकार की पीड़ा उत्पन्न करते हैं, उनका सर्वनाश तथा श्रेष्ठों का रक्षण करना तुम्हारा परम कर्त्तव्य है ॥३॥

युवामिद्युत्सु पृतनासु वह्नयो युवां क्षेमस्य प्रसवे मितज्ञवः।
ईशाना वस्व उभयस्य कारव इन्द्रावरुणा सुहवा हवामहे ॥४॥

युवां। इत्। युत्ऽसु। पृतनासु। वह्नयः। युवां। क्षेमस्य। प्रऽसवे। मितऽज्ञवः। ईशाना। वस्वः। उभयस्य। कारवः। इन्द्रावरुणा। सुऽहवा। हवामहे ॥४॥

पदार्थः—(इन्द्रावरुणा) भो विद्वांसः! वयं युष्मान् (सुहवा) सुखेन हातव्यान् (हवामहे) आहूय उपदिशामि, यत् यूयं (कारवः) कर्मशीलाः सन्तः (उभयस्य) राज्ञः प्रजानां च कल्याणाय (वस्वः) प्रयतध्वम् (ईशाना) ऐश्वर्यसम्पन्ना भूत्वा (मितज्ञवः) संकुचितजानुकाः=व्यायामादि प्रयत्नसम्पादितलघुशरीराः सन्त (क्षेमस्य, प्रसवे) क्षेमोत्पादने निमित्तं भवत (युवां) यूयं (पृतनासु) शत्रुसेनासु (वह्नयः) सोत्साहाः सन्तः (युत्सु) युद्धेषु (युवां) युष्माकम् (इत्) ज्ञानं वर्धतामिति युष्माभिः कर्तव्यम् ॥

पदार्थ—(इन्द्रावरुणा) हे विद्वान् पुरुषो! मैं तुम्हें (सुहवा) प्रेमपूर्वक (हवामहे) बुलाकर उपदेश करता हूँ कि तुम लोग (कारवः) कर्मशील बनकर (उभयस्य) राजा तथा प्रजा दोनों के कल्याण में (वस्वः) प्रयत्न करो, और (ईशाना) ऐश्वर्य्यसम्पन्न होकर (मितज्ञवः) व्यायाम साधित लघुशरीरवाले (क्षेमस्य, प्रसवे) सबके लिए सुख की वृद्धि करो (युवां) आप लोगों को उचित है कि (पृतना) युद्धों में (वह्नयः) उत्साही होकर (युत्सु) राज्य के संगठन में (युवां) तुम्हारा (इत्) ज्ञान वृद्धि को प्राप्त हो॥

भावार्थ—परमात्मा उपदेश करते हैं कि हे अध्यापक तथा उपदेशको! मैं तुम्हें बुलाकर अर्थात् ज्ञान द्वारा मेरे समीप स्थित हुए तुम्हें उपदेश करता हूँ कि तुम अनुष्ठानी बनकर राजा तथा प्रजा दोनों के हित में प्रयत्न करो क्योंकि अनुष्ठानशील पुरुष ही उपदेशों द्वारा संसार का कल्याण कर सकता है अन्य नहीं, हे विद्वानो! तुम युद्धविद्या के ज्ञाता बनकर सदैव अपने ज्ञान को बढ़ाते रहो, और युद्ध में उत्साहपूर्वक शत्रुओं का दमन करते हुए राज्य के संगठन में सदा प्रयत्न करते रहो ॥४॥

इन्द्रावरुणा यदिमानि चक्रथुर्विश्वा जातानि भुवनस्य मज्मना ।
क्षेमेण मित्रो वरुणं दुवस्यति मरुद्भिरुग्रः शुभमन्य ईयते ॥५॥२॥

इन्द्रावरुणा । यत् । इमानि । चक्रथुः । विश्वा । जातानि । भुवनस्य । मज्मना । क्षेमेण । मित्रः । वरुणं । दुवस्यति । मरुत्ऽभिः । उग्रः । शुभं । अन्यः । ईयते ॥५॥२॥

पदार्थः—(इन्द्रावरुणा) हे अग्निजलसम्बन्धिविद्यावेत्तारो विद्वांसः ! यूयम् (मज्मना) आत्मीयेन बलेन (विश्वा, जातानि) सकल वस्तूनि (क्षेमेण) सकुशलम् (भुवनस्य) जगति स्थितानि रक्षत (यत्) यदिदं (इमानि, चक्रथुः) युद्धविषयककार्यं कुरुथ तत् (मित्रः) जगतः सुखकारकं भवतु तथा च (वरुणम्) सर्वस्याच्छादने शक्तं जलमयं वायुम् (दुवस्यति) अपवार्य (उग्रः) संग्रामकुशलाः सैनिकाः (मरुद्भिः) नभसि प्रसरणशीलैर्वायुभिः शत्रूञ्जयन्तु (अन्यः) अन्ये सैनिकाः (शुभं) शुभैः साधनैः शत्रून् (ईयते) प्राप्नुवन्तु तत्समक्षं गच्छन्तु ॥

पदार्थ—(इन्द्रावरुणा) हे अग्नि तथा जलविद्यावेत्ता विद्वानो ! तुम लोग (मज्मना) अपने आत्मिक बल से (विश्वा, जातानि) सम्पूर्ण विश्व के अनुभव द्वारा (क्षेमेण) कुशलपूर्वक (भुवनस्य) संसार की रक्षा करो (यत्) जो (इमानि, चक्रथुः) यह युद्धविद्याविषयक कार्य्य करते हो वह (मित्रः) संसार को सुखकारक हो, और (वरुणं) सबको आच्छादन करनेवाली जलमय वायु को (दुवस्यति) दूर करके (उग्रः) युद्धविद्या में निपुण सैनिक पुरुष(मरुद्भिः) आकाश मण्डल में फैलनेवाली वायुओं द्वारा शत्रुओं को जीतें (अन्यः) अन्य सैनिक पुरुष (शुभं) शुभ साधनों द्वारा शत्रु को (ईयते) प्राप्त हों अर्थात् उसके सम्मुख जायें ॥

भावार्थ—हे आग्नेय तथा तथा जलीय अस्त्र शस्त्रों के वेत्ता विद्वानो ! तुम लोग अपने अनुभव द्वारा राज्य विरोधी शत्रुओं को विजय करके सम्पूर्ण संसार की रक्षा करो, तुम कलाकौशल के ज्ञान द्वारा युद्ध विषयक अस्त्र शस्त्र निर्माण करो, और ऐसे अस्त्रों का प्रयोग करो जो आकाश मण्डल में फैल जाने वाली वायुओं द्वारा शत्रु का विजय करें अर्थात् प्रबल शत्रु को आग्नेयास्त्र तथा वारुणास्त्र द्वारा विजय करो और साधारण शत्रु को शुभ साधनों से अपने वश में करो जिससे उसको घोर कष्ट न हो ॥५॥

महे शुल्काय वरुणस्य नु त्विष ओजो मिमाते ध्रुवमस्य यत्स्वम् ।
अजामिमन्यः श्नथयन्तमातिरद्दभ्रेभिरन्यः प्र वृणोति भूयसः ॥६॥

महे । शुल्काय । वरुणस्य । नु । त्विषे । ओजः । मिमाते । इति । ध्रुवं । अस्य । यत् । स्वं । अजामिं । अन्यः । श्नथयन्तं । आ । अतिरत् । दभ्रेभिः । अन्यः । प्र । वृणोति । भूयसः ॥६॥

पदार्थः—(वरुणस्य) वारुणास्त्रस्य प्रयोक्ता (नु) निश्चयम् (महे, शुल्काय) महत ऐश्वर्याय (त्विषे, ओजः) स्वेन तेजसा बलेन च (मिमाते) शत्रूञ्जयति (अतिरत्) अभिहन्ति (अस्य) अस्य शत्रोः (यत्) यत् किंचित् (ध्रुवम्) स्थिरम् (स्वं) धनमस्ति तत् (अजामिम्) अबन्धुं=स्वीयं करोति (श्नथयन्तम्)

स्वप्रतिपक्षिणं च जय (अन्य:) अन्यद्बलं च हन्ति (अन्य:) अन्यैः (दभ्रेभिः) अल्पैरेवसाधनैः (भूयसः) बहून् शत्रून् (प्र, वृणोति) स्ववशमानयति ।।

पदार्थ—(वरुणस्य) वारुणास्त्र का प्रयोग करनेवाला पुरुष (नु) निश्चय करके (महे, शुल्काय) बड़े ऐश्वर्य्य के लिए (त्विषे, ओजः) अपने तेज तथा बल द्वारा (मिमाते) शीघ्र ही शत्रु का (अतिरत्) हनन करता (अस्य) उनका (यत्) जो (ध्रुवं) निश्चल (स्वं) धन है वह (अजामिम्) शत्रु को (श्नथयन्त) नाश करदेता और (अन्य:) अन्य जो बल है वह (अतिरत्) हनन करता है, वह (अन्य:) अन्य (दभ्रेभिः) अल्प साधनों से ही (भूयसः) बहुत से शत्रुओं को (प्र, वृणोति) भले प्रकार अपने वश में करलेता है ।।६।।

भावार्थ—वारुणास्त्र का प्रयोग करनेवाला विद्वान् अल्प साधनों से ही शत्रुसेना का विजय करके उसकी सामग्री पर अपना अधिकार जमा लेता है, उसका शस्त्र अस्त्ररूप धन शत्रुओं के नाश का कारण होता है अर्थात् उसके इस अपूर्व धन के सम्मुख कोई शत्रु नहीं ठहर सकता, वह अनेक शत्रुओं को विजय करके बड़ा ऐश्वर्य्य सम्पन्न होता है ।।

अथ दुराधषस्य राज्ञो विभूतिः कथ्यते—

अब दुराधर्ष राजा की विभूति कथन करते हैं—

न तमंहो न दुरितानि मर्त्यमिन्द्रावरुणा न तपः कुतश्चन ।
यस्य देवा गच्छथो वीथो अध्वरं न तं मर्तस्य नशते परिह्वृतिः ।।७।।

न । तं । अंहः । न । दुःइतानि । मर्त्यं । इन्द्रावरुणा । न । तपः । कुतः । चन । यस्य । देवा । गच्छथः । वीथः । अध्वरं । न । तं । मर्तस्य । नशते । परिऽह्वृतिः ।।७।।

पदार्थः—(यस्य) यस्य राज्ञः (अध्वरम्) यज्ञम् (देवा) शस्त्रास्त्रादिविद्यासम्पन्नाः विद्वांसः (वीथः) समेत्य (गच्छथः) यान्ति (तं) तं राजानम् (मर्तस्य) मनुष्यं वा (परिह्वृतिः) काचिदपि बाधा (नशते न) न नाशयति, तथा (नापि) कुतः चन) कुतोऽपि (तपः) कश्चित्तापो नाशयति (मर्त्यं) यं मनुष्यम् (इन्द्रा, वरुणा) वैद्युतजलीयविद्ययोर्ज्ञातारः प्राप्नुवन्ति (तं) तं नरम् (न, अंहः) न किञ्चित्पापम् (न दुरितानि) नापि दुष्कर्माणि नाशयन्ति ।।

पदार्थ—(यस्य) जिस राजा के (अध्वरं) यज्ञ को (देवा) शस्त्रास्त्रादिविद्यासम्पन्न विद्वान् (वीथः) संगत होकर (गच्छथः) जाते हैं (तं) उस राजा को अथवा (मर्तस्य) मरणधर्मा मनुष्य को (परिह्वृति) कोई बाधा (नशते, न) नाश नहीं कर सकती, और (न) नाही (कुतः, चन) किसी ओर से (तपः) कोई ताप उसका नाश कर सकता है (मर्त्यं) जिस मनुष्य को (इन्द्रावरुणा) विद्युत् तथा जलीय विद्या जाननेवाले विद्वान् प्राप्त होते हैं (तं) उसको (न, अंहः) न कोई पाप (न, दुरितानि) न कोई दुष्कर्म नाश कर सकता है ।।

भावार्थ—परमात्मा उपदेश करते हैं कि हे राजा तथा यजमानो ! तुम लोग अस्त्रशस्त्र-विद्यासम्पन्न विद्वानों को अपने यज्ञों में बुलाओ, क्योंकि वारुणास्त्र तथा आग्नेयास्त्र आदि अस्त्र-विद्या वेत्ता विद्वान् जिस राजा वा यजमान के यज्ञ में जाते हैं अथवा जिनका उपरोक्त विद्वानों से घनिष्ठ सम्बन्ध होता है उनको न कोई ताप और न कोई अन्य बाधा नाश को प्राप्त कर सकती है, उनको न कोई शत्रु पीड़ा दे सकता और न कोई पाप उनका नाश कर सकता है अर्थात्

विद्वानों के सत्संग से उनके पाप क्षय होकर जीवन पवित्र हो जाता है, इसलिए राजाओं को उचित है कि विद्वानों का सत्कार करते हुए उनको अपना समीपी बनावें जिससे वह किसी विपत्ति को न देखें ॥७॥

अर्वाङ्नरा दैव्येनावसा गतं शृणुतं हवं यदि मे जुजोषथः ।
युवोर्हि सख्यमुत वा यदाप्यं मार्डीकमिन्द्रावरुणा नि यच्छतम् ॥८॥

अर्वाक् । नरा । दैव्येन । अवसा । आ । गतं । शृणुतं । हवं । यदि । मे । जुजोषथः । युवोः । हि । सख्यं । उत । वा । यत् । आप्यं । मार्डीकं । इन्द्रावरुणा । नि । यच्छतं ॥८॥

पदार्थः—(नरा) भो जनाः ! यूयम् (अर्वाक्) मम समक्षमागच्छत (उत्) तथा (दैव्येन, अवसा) दिव्यत्राणेन (आगतम्) आयातान्युष्मान् (हवम्) उपदिशामि, तत् (शृणुतम्) अवधानपराः शृणुत (इन्द्रावरुणा) हे विद्वांसः ! (यत्) यत् यूयं (यदि) चेत् (नियच्छतम्) निष्कपटाः सन्तो मनो निधाय (मे) मयि (जुजोषथः) योक्ष्यध्वे प्रेमपरा भविष्यथ, तर्हि अहम् (हि) निश्चयेन (युवोः सख्यम्) युष्मन्मैत्रीमभिरक्षिष्यामि (वा) यद्वा (आप्यम्) युष्मभ्यम् युष्मत्प्रापणीयम् (मार्डीकम्) सुखं दास्यामि ॥

पदार्थ—(नरा) हे मनुष्यो ? तुम (अर्वाक्) मेरे सम्मुख आओ (उत) और (दैव्येन, अवसा) दिव्य रक्षा से (आगतं) आये हुए तुमको (हवं) उपदेश करता हूँ जिसको (शृणुतं) ध्यानपूर्वक सुनो (इन्द्रावरुणा) हे विद्वानो ! (यत्) जो आप (यदि) (नियच्छतम्) निष्कपट भाव से मनोदान देकर (मे) मेरे में (जुजोषथः) जुड़ोगे = प्रीति करोगे तो मैं (हि) निश्चय करके (युवोः, सख्यं) तुम्हारी मैत्री का पालन करूंगा (वा) अथवा (आप्यं) तुम्हें प्राप्त होने योग्य (मार्डीकं) सुख दूंगा ॥

भावार्थ—परमात्मा उपदेश करते हैं कि आग्नेयास्त्र तथा वारुणास्त्र आदि अस्त्र शस्त्रों की विद्या में निपुण विद्वानो ! तुम सरलभाव से मेरे में प्रीति करो अर्थात् शुद्ध हृदय से वेदाज्ञा का पालन करते हुए मेरे सम्मुख आओ मैं तुम्हें सुखसम्पन्न करूंगा ॥८॥

अस्माकमिन्द्रावरुणा भरेभरे पुरोयोधा भवतं कृष्ट्योजसा ।
यद्वां हवन्त उभये अध स्पृधि नरस्तोकस्य तनयस्य सातिषु ॥९॥

अस्माकं । इन्द्रावरुणा । भरेऽभरे । पुरःऽयोधा । भवतं । कृष्टिऽओजसा । यत् । वां । हवन्ते । उभये । अध । स्पृधि । नरः । तोकस्य । तनयस्य । सातिषु ॥९॥

पदार्थः—(इन्द्रावरुणा) भो विद्वांसः ! यूयम् (भरे भरे) संग्रामे संग्रामे (अस्माकम्) अस्माकम् (पुरोयोधा) पुरस्ताद्योद्धारः (भवतम्) भवत (कृष्टचोजसा) हे शत्रुनाशक्षमबलबन्तः ? (यत्) ये (नरः) मनुष्याः (वाम्) युष्मान् (स्पृधि) युद्धे (तोकस्य, तनयस्य) पुत्रपौत्रादीनाम् (सातिषु) रक्षायै (हवन्ते) आह्वयन्ति तान् रक्षत ॥

पदार्थ—(इन्द्रावरुणा) हे विद्वानो ! तुम (भरे भरे) प्रत्येक संग्राम में (अस्माकं) हमारे (पुरोयोधा) सम्मुख (भवतं) होओ (कृष्ट्योजसा) हे शत्रुओं के नाशक बलवालो ! (यत्) जो (नरः) नेतारः (वां) तुम्हारा (स्पृधि) युद्ध में (तोकस्य, तनयस्य, सातिषु) पुत्र पौत्र की रक्षा के निमित्त (हवन्ते) आह्वान करते हैं, तुम उनकी रक्षा करो ।।

भावार्थ—परमात्मा उपदेश करते हैं कि हे विद्वानो ! तुम प्रत्येक संग्राम में मेरे सम्मुख होओ अर्थात् मुझसे विजय प्राप्ति के लिए प्रार्थना करो क्योंकि मेरी सहायता के बिना कोई किसी को जय नहीं कर सकता, हे बड़े बलवान योद्धाओ ! जो तुम्हारे साथ ईर्ष्या करते हैं वह भी अपनी स्वार्थसिद्धि के लिए है परन्तु प्रजा और धर्म की रक्षा करना तुम्हारा मुख्य कर्त्तव्य होने से तुम किसी का पक्षपात मत करो, सदा राजधर्म का पालन करना और राजा की आज्ञा में सदैव रहना तुम्हारा धर्म है, जिसका अनुष्ठान करते हुए परमात्मा के समीपी होओ ।।९।।

अथ राजपुरुषेभ्यो धनं परमात्मनो रक्षा च प्रार्थ्यते—

अब राजपुरुषों से धन और परमात्मा से रक्षा की प्रार्थना करते हैं—

अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः ।
अवध्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे ।।१०।।

अस्मे, इति । इन्द्रः । वरुणः । मित्रः । अर्यमा । द्युम्नं । यच्छन्तु । महि । शर्म । सऽप्रथः । अवध्रं । ज्योतिः । अदितेः । ऋतऽवृधः । देवस्य । श्लोकं । सवितुः । मनामहे ।।१०।।

पदार्थः—(इन्द्रः) वैद्युतविद्यावेत्तारः (वरुणः) जलविद्यावेत्तारः (मित्रः) जगतः सुहृदः (अर्यमा) न्यायकर्तारश्च ये राजपुरुषास्ते (अस्मे) अस्मभ्यम् (द्युम्नम्) ऐश्वर्यम् (यच्छन्तु) ददतु, तथा च (सप्रथः, महि, शर्म) सुप्रसिद्धं महत् सुखम् (ज्योतिः) परमात्मा नित्यं ददातु (अवध्रम्) अस्मान्सदा रक्षतु, यस्माद्ध्रुवम् (अदितेः) अखण्डनोयस्य (ऋतावृधः) सत्यरूपयज्ञस्याधारम् (देवस्य) दिव्यशक्तिसम्पन्नम् (सवितुः) स्वतःप्रकाशम् (श्लोकम्) पुण्यस्तुतिं (मनामहे) गायेम शश्वत् ।।

इति त्र्यशीतितमस्य सूक्तं तृतोयो वर्गश्च समाप्तः ।

पदार्थ—(इन्द्रः) वैद्युतविद्या वेत्ता (वरुणः) जलीयविद्या के ज्ञाता (मित्रः) सबके मित्र (अर्यमा) न्याय करनेवाले, जो राजकीय पुरुष हैं वे (अस्मे) हमें (द्युम्नं) ऐश्वर्य्य (यच्छन्तु) प्राप्त करायें और (सप्रथः, महि, शर्म) सब से बड़ा सुख (ज्योतिः) स्वयं प्रकाश परमात्मा हमको नित्य प्रदान करे (अवध्रं) हमको नाश न करें ताकि हम (अदितेः) अखण्डनीय (ऋतावृधः) सत्यरूपयज्ञ के आधार (देवस्य) दिव्यशक्तिसम्पन्न (सवितुः) स्वतःप्रकाश परमात्मा के (श्लोकं) यश को (मनामहे) सदा गान करते रहें ।।

भावार्थ—इस मन्त्र का आशय यह है जिस प्रकार ऋग्, यजु, साम, अथर्व यह चारों वेद परमात्मा की आज्ञा पालन कराने के लिए चार विभागों में विभक्त हैं, इसीप्रकार राज्य-शासन भी चार विभागों में विभक्त जानना चाहिए अर्थात् आग्नेयास्त्र तथा वारुणास्त्रविद्या जाननेवालों से सैनिक रक्षण और राजमन्त्री तथा न्यायाधीश इन दोनों से राज्य प्रबन्ध इस प्रकार उक्त चारों से धन की याचना करते हुए सदा ही इनके कल्याण का शुभचिन्तन करते

रहो अर्थात् सम्राट् के राष्ट्रप्रबन्ध के उक्त चारों से सांसारिक सुख की अभिलाषा करो और दिव्यशक्तिसम्पन्न परमात्मा से नित्य सुख की प्रार्थना करते हुए उनके दिव्य गुणों का सदा गान करते रहो, जिससे तुम्हें सद्‌गति प्राप्त हो ॥१०॥

८२ वां सूक्त और तीसरा वर्ग समाप्त हुआ ॥

अथ दशर्चस्य त्र्यशीतितमस्य सूक्तस्य—

वसिष्ठ ऋषिः ॥ इन्द्रावरुणौ देवते ॥ छन्दः—१, ३, ९ विराड्जगती ॥ २, ४, ६ निचृज्जगती । ५ आर्ची जगती । ७, ८, १० आर्षीजगती ॥ निषादः स्वरः ॥

अथ राजधर्मं वर्णयन्तः सैनिकेभ्यो रक्षां प्रार्थयन्ते—

अथ राजधर्म का वर्णन करते हुए सैनिक पुरुषों से रक्षा की प्रार्थना करते हैं—

युवां नरा पश्यमानास आप्यं प्राचा गव्यन्तः पृथुपर्शवो ययुः ।
दासा च वृत्रा हतमार्याणि च सुदासमिन्द्रावरुणावसावतम् ॥१॥

युवां । नरा । पश्यमानासः । आप्यं । प्राचा । गव्यन्तः । पृथुऽपर्शवः । ययुः । दासा । च । वृत्रा । हतं । आर्याणि । च । सुऽदासं । इन्द्रावरुणा । अवसा । अवतं ॥१॥

पदार्थः—(इन्द्रावरुणा) भो शूरा योद्धारः ! (युवाम्) यूयम् (आप्यम्) सर्वेषां सुलभा अर्थात् रक्षका भवत (पश्यमानासः) युष्मद्वीरतां प्रेक्षमाणाः (पृथुपर्शवः) सर्वतः पुष्टशरीराः (नरा) जनाः (गव्यन्तः) स्वं स्वमात्मानं समर्पयन्तः (ययुः) युष्मान् प्राप्नुवन्ति (च) तथा च (प्राचा, दासा) प्राचीनसेवकाः (च) तथा (आर्याणि) आर्यजनाश्च युष्मान् शरणमन्विच्छन्ति (वृत्रा, हतम्) यूयं शत्रूनपनीय (अवसा) रक्षन्तः (अवतं, सुदासम्) दयालुं नृपं प्राप्नुत ॥

पदार्थ—(इन्द्रावरुणा) हे शूरवीर योद्धाओ ! (युवां) तुम (आप्यं) सबको प्राप्त होने योग्य अर्थात् सबके रक्षक हो (पश्यमानासः) तुम्हारी वीरता देखकर (पृथुपर्शवः) सब ओर से हृष्ट-पुष्ट वीर (नरा) मनुष्य (गव्यन्तः) अपना आत्मसमर्पण करते हुए (ययुः) तुम्हें प्राप्त होते हैं (च) और (प्राचा, दासा) प्राचीन सेवक (च) और (आर्याणि) आर्य्य पुरुष भी तुम्हारी शरण चाहते हैं, तुम (वृत्रा, हतं) शत्रुओं का हनन करके (अवसा) रक्षा करते हुए (अवतं, सुदासं) दयावान् राजा को प्राप्त हो ॥

भावार्थ—परमात्मा उपदेश करते हैं कि हे शूरवीर विद्वानो ! तुम दास=शूद्र और आर्य्य=कर्मानुष्ठानपरायण पुरुषों की रक्षा करो, तुम इनके शत्रुओं का हनन करके इन्हें अभयदान दो, क्योंकि इनके होने से प्रजाजन वैदिकमर्यादा का अतिक्रमण नहीं करते, सब अपनी मर्यादा में रह कर धर्म का पालन करते हैं, और हृष्ट-पुष्ट शूरवीर तुम्हें प्राप्त होकर युद्ध द्वारा आत्मसमर्पण करते हुए तुम्हारे उत्साह को बढ़ाते हैं, इसलिए इन्हें भी सुरक्षित रखो, क्योंकि

शूरवीरों के अभाव से भी प्रजा में अनेक प्रकार के अनर्थ फैल जाते हैं जिससे मनुष्यों के जीवन में पवित्रता नहीं रहती ।।१।।

यत्रा नरः समयन्ते कृतध्वजो यस्मिन्नाजा भवति किं चन प्रियम् ।
यत्रा भयन्ते भुवना स्वर्दृशस्तत्रा न इन्द्रावरुणाधि वोचतम् ।।२।।

यत्र । नरः । सम्ऽअयन्ते । कृतऽध्वजः । यस्मिन् । आजा । भवति । किं । चन । प्रियम् । यत्र । भयन्ते । भुवना । स्वःऽदृशः । तत्र । नः । इन्द्रावरुणा । अधि वोचतं ।।२।।

पदार्थः—(यत्र) यस्मिन्संग्रामे (नरः) मनुष्याः (कृतध्वजः) उच्छ्रायितध्वजाः (समयन्ते) सुष्ठु आयान्ति (यस्मिन, आजा) यत्र संग्रामे (किंचन, प्रियं, भवति) किंचित् सुखं स्यात् (यत्र) यस्मिन्संग्रामे प्रबला योद्धारः (भयन्ते) विभ्यति तथा च (स्वर्दृशः, भुवना) यत्र देवाः स्वर्गप्राप्ति न बहु मन्यन्ते (इन्द्रावरुणा) भो युद्धकुशला विद्वांसः ! (तत्र) तस्मिन्संग्रामे (नः) अस्मान् (अधिवोचतम्) सविस्तरमुपदिशत ।।

पदार्थ—(यत्र) जिस संग्राम में (नरः) मनुष्य (कृतध्वजः) ध्वजा उठाये हुए (समयन्ते) भले प्रकार आगमन करते (यस्मिन्, आजा) जिस संग्राम में (किंचन, प्रियं, भवति) कुछ सुख हो (यत्र) जिस संग्राम में बड़े-बड़े योद्धा (भयन्ते) भयभीत होते, और (स्वर्दृशः, भुवना) जहाँ देवता लोग स्वर्गप्राप्ति को अधिक नहीं मानते (इन्द्रावरुणा) हे युद्धविद्या में निपुण विद्वानो ! (तत्र) वहाँ (नः) हमको (अधिवोचतं) भले प्रकार उपदेश करें ।।

भावार्थ—जिस संग्राम में शत्रु लोग ध्वजा उठाये हुए हम पर आक्रमण करते हों अथवा जिस संग्राम में हमारा कुछ प्रिय हो, या यों कहो कि जब शत्रु हम पर चढ़ाई करें वा हम दुष्टों के दमन अथवा प्रजा का प्रिय करने के लिए शत्रु पर चढ़ाई करें, हे अस्त्रशस्त्रवेत्ता विद्वानो ! उक्त दोनों अवस्थाओं में आप हमारी शत्रु से रक्षा करें ।।

तात्पर्य्य यह है कि राजपुरुषों की सहायता के बिना प्रजा में कदापि सुख उत्पन्न नहीं हो सकता, इसी लिए मन्त्र में राजपुरुषों की सहायता वर्णन की गई है कि वह राजपुरुष आपत्तिकाल में उपदेशों तथा शस्त्रों द्वारा हमारी रक्षा करें ।।२।।

सं भूम्या अन्ता ध्वसिरा अदृक्षतेन्द्रावरुणा दिवि घोष आरुहत् ।
अस्थुर्जनानामुप मामरातयोऽर्वागवसा हवनश्रुता गतम् ।।३।।

सं । भूम्याः । अन्ताः । ध्वसिराः । अदृक्षत । इन्द्रावरुणा । दिवि । घोषः । आ । अरुहत् । अस्थुः । जनानां । उप । मां । अरातयः । अर्वाक् । अवसा । हवनऽश्रुता । आ । गतं ।।३।।

पदार्थः—(इन्द्रावरुणा) भो युद्धपण्डिता राजपुरुषाः ! (घोषः, दिवि, आरुहत्) युष्मच्छस्त्रशब्दः आकाशे प्रसरतु (सं, भूम्याः, अन्ताः) अखिलभूमेरन्तः (ध्वसिराः) योद्धृभिर्विनाशितारिः (अदृक्षत) दृश्येत (अरातयः) शत्रवश्च (मां) माम् (जनानाम्) सर्वेषां जनानां समक्षम् (उप, अस्थुः) प्राप्नुयुः, तथा (अवसा) आत्मानं रिरक्षयिषवः (हवनश्रुता) अस्मद्यज्ञगिरं श्रुत्वा (अर्वाक्, आगतम्) अस्मदभिमुखमागच्छन्तु ।।

पदार्थ—(इन्द्रावरुणा) हे युद्धविद्या में निपुण राजपुरुषो ! (घोषः, दिवि, आरुहत्) तुम्हारे शस्त्रों का शब्द आकाश में व्याप्त हो (सं, भूम्याः, अन्ताः) सम्पूर्ण भूमि का अन्त (ध्वसिराः) योद्धाओं से विनाश होता हुआ (अदृक्षत) देखा जाय (अरातयः) शत्रु (माँ) मुझको (जनानां) सब मनुष्यों के समक्ष (उप, अस्थुः) आकर प्राप्त हो, और (अवसा) रक्षा चाहते हुए (हवनश्रुता) वैदिकवाणियों के श्रवण द्वारा (अर्वाक्, आगतम्) हमारे सम्मुख आवें ।।

भावार्थ—परमात्मा उपदेश करते हैं कि हे राजधर्म का पालन करनेवाले विद्वानो ! तुम शत्रुसेना पर ऐसा घोर आक्रमण करो कि तुम्हारे अस्त्रों-शस्त्रों का शब्द आकाश में गूँज उठे जिससे तुम्हारे शत्रु वेदवाणी का आश्रयण करते हुए तुम्हारी शरण को प्राप्त हों अर्थात् अपने दुष्टभावों का त्याग करते हुए सब प्रजाजनों के समक्ष वेद की शरण में आवें, और तुम्हारे योद्धा लोग सीमान्तों में विजय प्राप्त करते हुए शत्रुओं के दुर्गों को छिन्न-भिन्न करके सर्वत्र अपना अधिकार स्थापन करें जिससे प्रजा वैदिकधर्म का भले प्रकार पालन कर सके ।।३।।

इन्द्रावरुणा वधनाभिरप्रति भेदं वन्वन्ता प्र सुदासमावतम् ।
ब्रह्माण्येषां शृणुतं हवीमनि सत्या तृत्सूनामभवत्पुरोहितिः ॥४॥

इन्द्रावरुणा । वधनाभिः । अप्रति । भेदं । वन्वन्ता । प्र । सुऽदासं । आवतं । ब्रह्माणि । एषां । शृणुतं । हवीमनि । सत्या । तृत्सूनां । अभवत् । पुरःऽहितिः ।।४।।

पदार्थः—(इन्द्रावरुणा) भो राजधर्मपालका विद्वांसः ! यूयम् (वधनाभिः) अनेकविधैः शस्त्रैः (अप्रतिभेदम्) दुर्वार्यशत्रून् (वन्वन्ता) हिंसन्तः (सुदासं) अतिशयेन नम्रीभूतंराजानम् (आवतम्) प्राप्नुत (एषां, तृत्सूनाम्) एषां विदुषाम् (ब्रह्माणि) वेदपाठान् (शृणुतम्) आकर्णयन्तः (पुरोहितिः) हितकारिणो भवत, येन (हवीमनि) यज्ञे (सत्या, अभवत्) सत्यस्वरूपं फलमुत्पद्यताम् ।।

पदार्थ—(इन्द्रावरुणा) हे राजधर्म का पालन करनेवाले विद्वानो ! तुम (वधनाभिः) अनन्त प्रकार के शस्त्रों द्वारा (अप्रति, भेदं) प्रबल शत्रुओं को (वन्वन्ता) हनन करके (सुदासं, आवतं) भलीभाँति नम्रभाव को प्राप्त राजा को प्राप्त होओ, और (एषां, तृत्सूनां) इन विद्वानों के (ब्रह्माणि) वेदपाठों को (शृणुतं)श्रवण करते हुए(पुरोहितिः) हितकारी बनो जिससे(हवीमनि) यज्ञों में (सत्या, अभवत्) सत्यरूप फल हो ।।

भावार्थ—परमात्मा आज्ञा देते हैं कि हे राजपुरुषो ! तुम वेद से बहिर्मुख शत्रुओं का हनन करके वेदवेत्ता विद्वानों का सत्कार करो और उनका निरन्तर हित करते हुए उनके सत्संग से अपने जीवन को उच्च बनाओ, उनके यज्ञों की रक्षा करो जिससे उनका सत्यरूप फल प्रजा के लिए शुभ हो ।।४।।

इन्द्रावरुणावभ्या तपन्ति माघान्यर्यो वनुषामरातयः ।
युवं हि वस्व उभयस्य राजथोऽध स्मा नोऽवतं पार्ये दिवि ॥५॥४॥

इन्द्रावरुणौ । अभि । आ । तपन्ति । मा । अघानि । अर्यः । वनुषां । अरातयः । युवं । हि । वस्वः । उभयस्य । राजथः । अध । स्म । नः । अवतं । पार्ये । दिवि ॥५॥४॥

पदार्थः—(इन्द्रावरुणौ) भो विद्यावन्तो राजपुरुषाः ! (मा) माम् (अर्यः) शत्रूणाम् (अरातयः, वनुषाम्) हिंसकानां मध्ये येऽरातयस्तेषां च (अघानि) अहन्तृणि आयुधानि (अभि, आतपन्ति) सर्वतः क्लिश्नन्ति (हि) निश्चयेन (युवम्) यूयम् (वस्वः) तेषां सर्वस्वमपहृत्य (उभयस्य, राजथः) द्विविधानपि बलवतः शत्रून् (अध) अधः पातयत, तथा च (नः स्म, अवतम्) अस्मान् तेभ्यो रक्षन्तः (पार्ये, दिवि) विजयस्वरूपं पारं गमयत ॥

पदार्थ—(इन्द्रावरुणौ) हे विद्यासम्पन्न राजपुरुषो ! (मा) मुझको (अर्यः) शत्रु और (अरातयः, वनुषां) हिंसक शत्रुओं के (अघानि) पापरूपशस्त्र (अभि, आतपन्ति) चारों ओर से तपाते हैं (हि) निश्चय करके (युवं) आप लोग (वस्वः) उनका सर्वस्व हरण करके (उभयस्य, राजथः) दोनो प्रकार के बलवान् क्षत्रुओं को (अध) नीचे गिरायें, और (नः, स्म, अवतं) हमारी उनसे रक्षा करते हुए (पार्ये, दिवि) विजयरूप पार को प्राप्त करायें ॥

भावार्थ—परमात्मा उपदेश करते हैं कि हे इन्द्र तथा वरुणसमान युद्धविशारद विद्वानो ! तुम हिंसक तथा अन्य शत्रुओं का सर्वस्व हरण करके उनका नाश करो जो वेदविहितमर्यादा पर चलनेवाले विद्वानों को तपाते=दुःख देते हैं। हे भगवन् ! आप ऐसी कृपा करें कि उन शत्रुओं का युद्ध में अधः पतन हो और हम विजयरूप पार को प्राप्त हों ॥५॥

युवां हवन्त उभयास आजिष्विन्द्रं च वस्वो वरुणं च सातये।
यत्र राजभिर्दशभिर्निबाधितं प्र सुदासमावतं तृत्सुभिः सह ॥६॥

युवां । हवन्ते । उभयासः । आजिषु । इन्द्रं । च । वस्वः । वरुणं । च । सातये । यत्र । राजऽभिः । दशऽभिः । निऽबाधितं । प्र । सुऽदासं । आवतं । तृत्सुऽभिः । सह ॥६॥

पदार्थः—भो इन्द्रवरुणस्वरूपा योद्धारः ! (युवाम्) युष्मान् वयम् (उभयासः, आजिषु) उभयविधेषु युद्धेषु (हवन्ते) आह्वयामः (इन्द्रं, च वस्वः) इन्द्रं धनाय (च) तथा (वरुणं, सातये) वरुणं च विजयप्राप्त्यै (यत्र) यस्मिन्युद्धे (दशभिः, राजभिः) दशसंख्याकैराजभिः (निबाधितम्) आक्रान्तम् (तृत्सुभिः, सह) त्रिविधैर्ज्ञानिभिः सह (सुदासं) सुनृपम् (आवतम्) प्राप्नुत—रक्षत ॥

पदार्थ—हे इन्द्र तथा वरुणरूप योद्धाओ ! (युवां) आपको हम लोग (उभयासः, आजिषु) दोनो प्रकार के युद्धों में (हवन्ते) बुलाते हैं (इन्द्रं, च, वस्वः) इन्द्र को धन के लिए (च) और (वरुणं, सातये) वरुण को विजयप्राप्ति के लिए (यत्र) जिस युद्ध में (दशभिः, राजभिः) दश-प्रकार के राजाओं से (निबाधितं) पीड़ा को प्राप्त (तृत्सुभिः, सह) तीनों प्रकार के ज्ञानियों के साथ (सुदासं) योग्य राजा को (आवतं) प्राप्त होओ ॥

भावार्थ—परमात्मा उपदेश करते हैं कि हे इन्द्र तथा वरुणरूप विद्वानो ! तुम युद्धों में विजयप्राप्त करते हुए कर्मानुष्ठानी तथा वेदविद्याप्रकाशक विद्वानों की रक्षा करो अर्थात् कर्म, उपासना तथा ज्ञान द्वारा भक्तिभाव को प्राप्त पुरुषों की सेवा में सदा तत्पर रहो, जिससे उन्हें कोई कष्ट प्राप्त न हों ॥६॥

सम्प्रतिवेदानुयायियोद्धुः अतिशायिबलं वर्ण्यते—

अब वेदानुयायी योद्धा का अपरिमित्त बल कथन करते हैं—

दश राजानः समिता अयज्यवः सुदासमिन्द्रावरुणा न युयुधुः ।
सत्या नृणामद्मसदामुपस्तुतिर्देवा एषामभवन्देवहूतिषु ॥७॥

दश । राजानः । सम्ऽइताः । अयज्यवः । सुऽदासं । इन्द्रावरुणा । न । युयुधुः । सत्या । नृणां । अद्मऽसदां । उपऽस्तुतिः । देवाः । एषां । अभवन् । देवऽहूतिषु ॥७॥

पदार्थः—(अयज्यव) अवैदिकाः (दश, राजानः) दशसंख्याका राजानः (समिता) सम्मिलिताः सन्तः (सुदासम्) वेदानुयायिनैकेन राज्ञा (न, युयुधुः) युद्धं न कर्तुं शक्नुवन्ति (देवहूतिषु) युद्धेषु (अद्मसदां, देवाः) याजका विद्वांसः (एषाम्) एषां वेदानुयायिनाम् (नृणाम्) मनुष्याणाम् (सत्या) सत्यतया (उपस्तुतिः) उपस्तुतिम् (अभवन्) कुर्वन्ति (इन्द्रावरुणा) भो विद्याभिरलङ्कृता राजपुरुषाः ! यूयमीदृक् साधनसम्पन्नपुरुषाणां सहाया भवत ॥

पदार्थ—(अयज्यवः) अवैदिक (दश, राजानः) दश राजा (समिताः) इकट्ठे होकर (सुदासं) वेदानुयायी राजा से (न, युयुधुः) युद्ध नहीं कर सकते (देवहूतिषु) युद्धों में (अद्मसदां, देवाः,) यज्ञशील विद्वान् पुरुष (एषां) इन (नृणां) वेदानुयायी पुरुषों की (सत्या) सत्यरूप से (उपस्तुतिः) स्तुति (अभवन्) करते हैं (इन्द्रावरुणा) हे विद्यासम्पन्न राजपुरुषो ! तुम ऐसे साधनसम्पन्न पुरुषों की सहायता करो ॥

भावार्थ—इस मन्त्र में यह उपदेश किया है कि राजा तथा राजकीय पुरुषों को सदा वैदिक धर्म का अनुष्ठान करना चाहिए, क्योंकि व्रत, तप तथा अनुष्ठानशील राजा को दश राजा भी मिलकर युद्ध में पराजय नहीं कर सकते, दृढव्रती, कर्मकाण्डी तथा धीर-वीर राजा की सब विद्वान् प्रशंसा करते और वही अपने सब कार्यों को विधिवत् करता हुआ संसार में कृतकार्य्य होता है, ऐसे धर्मज्ञ राजा की सब विद्वानों को सहायता करनी चाहिए ॥७॥

दाशराज्ञे परियत्ताय विश्वतः सुदास इन्द्रावरुणावशिक्षतम् ।
श्वित्यञ्चो यत्र नमसा कपर्दिनो धिया धीवन्तो असपन्त तृत्सवः ॥८॥

दाशऽराज्ञे । परिऽयत्ताय । विश्वतः । सुऽदासे । इन्द्रावरुणौ । अशिक्षतं । श्वित्यञ्चः । यत्र । नमसा । कपर्दिनः । धिया । धीऽवन्तः । असपन्त । तृत्सवः । ॥८॥

पदार्थः—(यत्र) यस्मिन्युद्धे (नमसा) प्रभुत्वेन (कपर्दिनः) स्वलङ्कृताः (धीवन्तः) बुद्धिमन्तः (तृत्सवः) कर्मकाण्डिनः (श्वित्यञ्चः) सदाचारिणः (असपन्त धिया) युद्धकर्मसु बुद्धया प्रवर्त्तन्ते, तत्र युद्धे (विश्वतः) सर्वतः दाशराज्ञे, परियत्ताय)

दशभिर्नृपैराक्रान्तान् (सुदासे) वेदानुयायिनो नृपस्य (इन्द्रावरुणौ) हे शस्त्रास्त्र-विद्यावेत्तारो विद्वांसः (अशिक्षतम्) पर्याप्तिबलान् कुरुत ॥

पदार्थ—(यत्र) जिस युद्ध में (नमसा) प्रभुता से (कपर्दिनः) उत्तम अलङ्कारयुक्त (धीवन्तः) बुद्धिमान् (तृत्सवः) कर्मकाण्डी (श्वित्यञ्चः) सदाचारी (असपन्त) युद्धरूप कर्म में (धिया) बुद्धिपूर्वक प्रवृत्त होता है, उस युद्ध में (विश्वतः) सब ओर से (दशराज्ञे, परियत्ताय) दश राजाओं के आक्रमण करने पर (सुदासे) वेदानुयायी राजा को (इन्द्रावरुणौ) हे अस्त्र-शस्त्रों की विद्या में कुशल विद्वानो ! (अशिक्षतं) बल प्रदान करो ॥

भावार्थ—परमात्मा उपदेश करते हैं कि राजा लोगो ! तुम कर्मकाण्डयुक्त तथा सदाचार सम्पन्न होकर अपने कार्यों को विधिवत् करो और युद्धरूप कर्म में बुद्धिपूर्वक प्रवृत्त होओ, जो सदाचार सम्पन्न राजा बुद्धिपूर्वक युद्ध करता है उसको अनेक राजा सब ओर से आक्रमण करने पर भी विजय नहीं कर सकते । परमात्मा आज्ञा देते हैं कि हे धनुर्विद्यासम्पन्न अध्यापक तथा उपदेशको ! तुम ऐसे धर्मपरायण राजा की सदा सहायता करो जिससे वह शीघ्र कृतकार्य हो ॥८॥

वृत्राण्यन्यः समिथेषु जिघ्नते व्रतान्यन्यो अभि रक्षते सदा ।
हवामहे वां वृषणा सुवृक्तिभिरस्मे इन्द्रावरुणा शर्म यच्छतम् ॥९॥

वृत्राणि । अन्यः । सम्ऽइथेषु । जिघ्नते । व्रतानि । अन्यः । अभि । रक्षते । सदा । हवामहे । वां । वृषणा । सुवृक्तिऽभिः । अस्मे इति । इन्द्रावरुणा । शर्म । यच्छतं ॥९॥

पदार्थः—(अन्यः, समिथेषु) एको योद्धा युद्धक्षेत्रे (वृत्राणि, जिघ्नते) शत्रूञ्जयति (अन्यः) एकः (सदा) सततम् (अभि) सर्वथा (व्रतानि) नियमान् (रक्षते) संसेव्य रक्षति (इन्द्रावरुणा) भो इन्द्रवरुणस्वरूपा योद्धारः ! (माम्) यूयम् (अस्मे) अस्मभ्यम् (शर्म, यच्छतम्) सुखं प्रयच्छत यतो यूयम् (वृषणा) योद्धुरभि-लाषप्रदातारः (सुवृक्तिभिः) शुभमार्गप्रवर्त्तकाश्च स्थः, अतः (हवामहे) वयं युष्माना-ह्वयामः ॥

पदार्थ—(अन्यः, समिथेषु) एक शूरवीर युद्धों में (वृत्राणि, जिघ्नते) शत्रुओं को विजय करता (अन्यः) एक (सदा) सदैव (अभि) सर्वप्रकार से (व्रतानि) नियमों की (रक्षते) रक्षा करता है (इन्द्रावरुणा) इन्द्र तथा वरुणरूप योद्धाओं ! (वां) आप (अस्मे) हमको (शर्म, यच्छतं) सुख प्राप्त करायें, क्योंकि आप (वृषणा) युद्ध की कामना पूर्ण करनेवाले और (सुवृक्तिभिः) शुभ मार्गों में प्रवृत्त करानेवाले हैं, इसलिये (हवामहे) हम आपका आह्वान करते हैं ॥

भावार्थ—जो राजा लोग व्रतों की रक्षा करते और दुष्ट शत्रुओं का दमन करते हैं, हे अस्त्रशस्त्रविद्यावेत्ता विद्वानों ! तुम उनकी सहायता करो, क्योंकि व्रत पालन तथा दुष्टदमन किये बिना प्रजा में सुख का संचार कदापि नहीं हो सकता, इसी अभिप्राय से वेद मे अन्य उपदेश किया है कि—

अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्
इदमहमनृतात् सत्यमुपैमि ।। यजु० ।। १ ।। ५ ।।

अर्थ—हे व्रतों के पति परमात्मा ! मैं आपकी कृपा से व्रत का पालन करूँ ताकि असत्य-मार्ग को त्याग कर सत्य पथ को प्राप्त होऊँ, इस प्रकार वेदों में सर्वत्र नियमपालनरूप व्रत का बलपूर्वक उपदेश किया गया है उसी की दृढ़ता का इस मन्त्र में वर्णन किया है, या यों कहो कि परमात्मा दृढ़व्रती लोगों के सदैव सहायक होते हैं और परमात्मा के नियम पर चलनेवाले पुरुषों को भी उचित है कि वह ऐसे भावोंवाले पुरुषों के सहायक बनें ।।९।।

अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः ।
अवध्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे ।।१०।।

अस्मे इति । इन्द्रः । वरुणः । मित्रः । अर्यमा । द्युम्नं । यच्छन्तु । महि । शर्म । सऽप्रथः । अवध्रं । ज्योतिः । अदितेः । ऋतऽवृधः । देवस्य । श्लोकं । सवितुः । मनामहे ।।१०।।

पदार्थः—(इन्द्रः) वैद्युतविद्याऽभिज्ञः (वरुणः) जलीयविद्यावेत्ता (मित्रः) राजमन्त्री (अर्यमा) न्यायाधीशः (अस्मे) अस्मभ्यम् (द्युम्नम्) दीप्तिमत् (महि) महत् (सप्रथः) सुप्रख्यातं(शर्म) सुखम् (यच्छन्तु) ददतु (ज्योतिः) ज्योतिःस्वरूपः (अवध्रम्) नित्यः (अदितेः) अखण्डनीयो विभुः (ऋतावृधः) सत्यस्वरूपः (देवस्य) दिव्यात्मा (सवितुः) विश्वजनको यो भगवान् तस्य (श्लोकम्) स्तुतिम् (मनामहे) कुर्महे ।।

इति त्र्यशीतितमं सूक्तं पञ्चमो वर्गश्च समाप्तः ।

पदार्थ—(इन्द्रः) वैद्युतविद्यावेत्ता (वरुणः) जलीयविद्या के ज्ञाता (मित्रः) राजमन्त्री (अर्यमा) न्यायाधीश (अस्मे) हमको (द्युम्नं) दीप्तिवाला (महि) बड़ा (सप्रथः) विस्तृत (शर्म) सुख (यच्छन्तु) प्राप्त करायें (ज्योतिः) हे दिव्यस्वरूप (अवध्रं) नित्य (अदितेः) अखण्डनीय (ऋतावृधः) सत्यस्वरूप (देवस्य) दिव्य स्वरूप (सवितुः) सबके उत्पादक परमात्मन् ! मैं आपकी (श्लोकं) स्तुति (मनामहे) करता हूँ ।।

भावार्थ—हे न्यायाधीश परमात्मन् ! आप इन्द्रादि विद्वानों द्वारा हमको नित्य सुख की प्राप्ति करायें, और ऐसी कृपा करें कि हम आपके सत्यादि गुणों का गान करते हुए सदैव आपकी स्तुति में तत्पर रहें ।।१०।।

८३वां सूक्त और ५वां वर्ग समाप्त हुआ ।

पञ्चर्चस्य चतुरशीतितमस्य सूक्तस्य

वसिष्ठ ऋषिः ॥ इन्द्रावरुणौ देवते ॥ छन्द—१, २, ४, ५ निचृत्त्रिष्टुप् । ३ त्रिष्टुप् ॥ धैवतः स्वरः ॥

अथ परमात्मा प्रकारान्तरेण राजधर्ममुपदिशति—

अब परमात्मा प्रकारान्तर से राजधर्म का उपदेश करते हैं—

आ वां राजानावध्वरे ववृत्यां हव्येभिरिन्द्रावरुणा नमोभिः ।
प्र वां घृताची बाह्वोर्दधाना परि त्मना विषुरूपा जिगाति ॥१॥

आ । वां । राजानौ । अध्वरे । ववृत्यां । हव्येभिः इन्द्रावरुणा । नमःऽभिः । प्र । वां । घृताची । बाह्वोः । दधाना । परि । त्मना । विषुऽरूपा । जिगाति ॥१॥

पदार्थः—(इन्द्रावरुणा) भो इन्द्रावरुणौ देवौ ! (वां, राजानौ) प्रकाशवन्तौ युवाम् (अध्वरे) संग्रामे (ववृत्याम्) आह्वयामि (हव्येभिः, नमोभिः) नम्राभिर्वाग्भिः युवां सत्करोमि (वां) युवाम् (बाह्वोः) भुजयोः (आ) सुरीत्या (घृताची) स्रुवम् (दधाना) धारयन्तः (परि त्मना) सम्यक् स्वयमेव (विषुरूपा) बहुविधद्रव्यैः (जिगाति) संबोधयामि ॥

पदार्थ—(इन्द्रावरुणा) हे इन्द्र तथा वरुण ! (वां, राजानौ) प्रकाशवाले आप दोनों (अध्वरे) संग्राम में (ववृत्यां) आवें (हव्येभिः, नमोभिः) हम नम्र वाणियों द्वारा आपका सत्कार करते हैं (वां) आपको (बाह्वोः) हाथों में (आ) भले प्रकार (घृताची) स्रुवा (दधाना) धारण कराते हुए (परि, त्मना) शुभ संकल्प से (विषुरूपा) नानाप्रकार के द्रव्यों द्वारा (जिगाति) उद्बोधन करते हैं ॥

भावार्थ—परमात्मा उपदेश करते हैं कि हे यज्ञमानो ! तुम अग्निविद्यावेत्ता तथा जल वायु आदि तत्त्वों की विद्या जाननेवाले विद्वानों को दुष्ट दमनरूप संग्राम में बुलाओ और नम्रवाणियों द्वारा उनका सत्कार करते हुए उनको उद्बोधन करो कि हे भगवन् ! जिस प्रकार घृतादि पदार्थों से अग्नि देदीप्यमान होती है इसी प्रकार आप हमारे सम्मानादि भावों से देदीप्यमान होकर शत्रुरूप समिधाओं को शीघ्र ही भस्म करें जिससे हमारी शुभकामानायें पूर्ण हों ॥

तात्पर्य्य यह कि इस मन्त्र में युद्धविद्यावेत्ता सैनिक पुरुषों का सत्कार कथन किया गया है अर्थात् राजा अपने सैनिक तथा विद्वान् पुरुषों का सत्कार सदैव करे जिससे वे राजधर्म का अङ्ग बनकर राजा की रक्षा में सदा तत्पर रहें ॥१॥

सम्प्रति प्रेमरज्जुबद्धस्य राष्ट्रस्य दार्ढ्यं वर्ण्यते—

अब प्रेम रज्जू से बंधे हुए राष्ट्र की दृढ़ता का वर्णन करते हैं—

युवो राष्ट्रं बृहदिन्वति द्यौर्यौ सेतृभिररज्जुभिः सिनीथः ।
परि नो हेळो वरुणस्य वृज्या उरुं न इन्द्रः कृणवदु लोकम् ॥२॥

युवोः । राष्ट्रं । बृहत् । इन्वति । द्यौः । यौ । सेतृऽभिः । अरज्जुऽभिः । सिनीथः । परि । नः । हेळः । वरुणस्य । वृज्याः । उरुं । नः । इन्द्रः । कृणवत् । ऊं इति । लोकं ॥२॥

पदार्थः—(युवोः) हे नृपास्तथा राजपुरुषाः ! युष्माकम् (राष्ट्रम्) राज्यम् (द्यौः, बृहत्, इन्वति) द्युलोकपर्यन्तं सुविस्तीर्यताम् (यौ) युवां द्वावपि (परि) अभितः (सेतृभिः, अरज्जुभिः, सिनीथः) रज्जुरहितरज्जुसदृशप्रेमात्मकबन्धनैर्बद्धौ (नः) अस्मान् प्राप्नुयातम् (ऊ) तथा च (लोकम्) युवयोर्भुवनम् (इन्द्रः) विद्युद्विद्यावेत्ता (कृणवत्) रक्षतु (वरुणस्य, हेळः) जलीयविद्याभिज्ञविदुष आक्रमणम् (वृज्याः) युष्मदुपरि न भवेत् युवां प्रार्थयेथाम् (नः) अस्माभिः (उरुम्) विस्तृतलोकाः प्राप्यन्ताम् ॥

पदार्थ—(युवोः) हे राजा तथा राजपुरुषो ! तुम्हारा (राष्ट्रं) राज्य (द्यौः, बृहत्, इन्वति) द्युलोकपर्य्यन्त बड़ा विस्तृत हो (यौ) तुम दोनों (परि)सब ओर से (सेतृभिः, अरज्जुभिः, सिनीथः) प्रेमरूप रज्जुओं में बंधे हुए (नः) हमको प्राप्त हों (उ) और (लोकं) तुम्हारे लोक को (इन्द्रः) विद्युद्विद्यावेत्ता विद्वान् (कृणवत्) रक्षा करें (वरुणस्य, हेळः) जलविद्यावेत्ता विद्वान् का आक्रमण (वृज्याः) तुम पर न हो, और तुम प्रार्थना करो कि (नः) हमको (उरुं) विस्तृत लोकों की प्राप्ति हो ॥

भावार्थ—परमात्मा उपदेश करते हैं कि हे राजपुरुषो ! तुम सदैव अपने राष्ट्र की वृद्धि में लगे रहो और उसको प्रेमरूप रज्जु के बन्धन से ऐसा बांधो कि वह किसी प्रकार से भी शिथिलता को प्राप्त न हो, अधिक क्या जिनके राष्ट्र दृढ़ बन्धनों से बंधे हुए हैं उन पर न कोई जलयानों द्वारा आक्रमण कर सकता और न कोई विद्युत् आदि शक्तियों से उसको हानि पहुँचा सकता है । जो राजा अपने राष्ट्र को दृढ़ बनाने के लिए प्रजा में प्रेम उत्पन्न करता अर्थात् अन्याय और दुराग्रह का त्याग करता हुआ अपने को विश्वासार्ह बनाता है तब वह दोनों परस्पर उन्नत होते और पृथिवी से लेकर द्युलोकपर्य्यन्त सर्वत्र उनका अटल प्रभाव हो जाता है, इसलिए उचित है कि राजा अपने राष्ट्र को दृढ़ बनाने के लिए प्रजा में प्रेम उत्पन्न करे, प्रजा में प्रेम का संचार करनेवाला राजा ही अपने सब कार्यों को विधिवत् करता और वही अन्ततः परमात्मा को प्राप्त होता है ॥२॥

कृतं नो यज्ञं विदथेषु चारुं कृतं ब्रह्माणि सूरिषु प्रशस्ता ।
उपो रयिर्देवजूतो न एतु प्र णः स्पार्हाभिरूतिभिस्तिरेतम् ॥३॥

कृतं । नः । यज्ञं । विदथेषु । चारुं । कृतं । ब्रह्माणि । सूरिषु । प्रऽशस्ता । उपो इति । रयिः । देवऽजूतः । नः । एतु । प्र । नः । स्पार्हाभिः । ऊतिऽभिः । तिरेतं ॥३॥

पदार्थः—भो नानाविधविद्यावेत्तारः ! (नः) अस्माकम् (यज्ञम्) क्रतुम् (विदथेषु) अस्मद्यज्ञशालायाम् (चारुं, कृतम्) शोभनं विधत्त=सफलं कुरुत (ब्रह्माणि) वैदिकस्तोत्राणि (सूरिषु) ज्ञातिषु मध्ये (प्रशस्ता, कृतम्) प्रशंसनीयं कुरुत (नः) अस्माभिः (देवजूतः) युष्मत्कर्तृकाभिरक्षया (उपो, एतु, रयिः) सुस्थिरं पुष्कलं धनं प्राप्यताम् (नः) अस्मान् (प्र) नानाविधाभिः (स्पार्हाभिः) स्वाभिलषिताभिः (ऊतिभिः) रक्षाभिः (तिरेतम्) समुन्नमयत ।

पदार्थ—हे विद्वान् राजपुरुषो ! (नः) हमारे (यज्ञं) यज्ञ को (विदथेषु) हमारे गृहों में (चारुं, कृतं) सुन्दर बनायें (ब्रह्माणि) वैदिकस्तोत्रों को (सूरिषु) शूरवीरों में (प्रशस्ता, कृतं) प्रशंसनीय बनाओ (नः) हमारे (देवजूतः) आपकी रक्षा से (उपो, एतु, रयिः) उत्तमोत्तम पुष्कल धन प्राप्त हो, और (नः) हमको (प्र) सर्व प्रकार की (स्पार्हाभिः) अभिलषित (ऊतिभिः) रक्षाओं से (तिरेतम्) उन्नत करो ।।

भावार्थ—परमात्मा आज्ञा देते हैं कि हे न्यायाधीश तथा सेनाधीश राजपुरुषो ! तुम प्रजाजनों को प्राप्त होकर उनके घरों को यज्ञों द्वारा सुशोभित करो और शूरवीरों को वैदिक-शिक्षा दो ताकि वह वेदवाणीरूप ब्रह्मस्तोत्रों का प्रजा में भलीभाँति प्रचार करें और राजा तथा प्रजा दोनों ऐश्वर्य्ययुक्त पदार्थों से भरपूर हों, और प्रजाजन भी उन विद्वानों से प्रार्थना करें कि हे भगवन् ! आपकी रक्षा से हमको पुष्कल धन प्राप्त हो और हम आपकी रक्षा में रहकर मनोभिलषित उन्नति करें ।।३।।

अस्मे इन्द्रावरुणा विश्ववारं रयिं धत्तं वसुमन्तं पुरुक्षुम् ।
प्र य आदित्यो अनृता मिनात्यमिता शूरो दयते वसूनि ।।४।।

अस्मे इति । इन्द्रावरुणा । विश्वऽवारं । रयिं । धत्तं । वसुऽमन्तं । पुरुऽक्षुं । प्र । यः । आदित्यः । अनृता । मिनाति । अमिता । शूरः । दयते । वसूनि ।।४।।

पदार्थः—(इन्द्रावरुणा) इन्द्रः परमैश्वर्यसम्पन्नः तथा वरुणः सर्वेषामुपास्यः परमात्मा (विश्ववारम्) जगत्संभजनीयः (वसुमन्तम्) विविधरत्नसम्पन्नम् (रयिं, धत्तं) सकलसम्पदं दधानः (पुरुक्षुम्) बहुविधान्नयुक्तः तथा (यः) यः (प्र) सम्यक् (आदित्यः) अज्ञानध्वंसकश्चास्ति सः (अनता, मिनाति) असत्यवादिनो दण्डयति, तथा (शूरः) शूरान् (अमिता, वसूनि, दयते) अपरिमितधनवतः करोति (अस्मे) सदयमस्मानपि तथाविधसम्पत्तिसमृद्धान् करोतु ।।

पदार्थ—(इन्द्रावरुणा) इन्द्र=परमैश्वर्य्ययुक्त तथा वरुण=सब का उपास्यदेव परमात्मा (विश्ववारं) सबको रुचिकर (वसुमन्तं) सबप्रकार के धनों से युक्त (रयिं, धत्तं) सम्पूर्ण ऐश्वर्य्य को धारण करनेवाला (पुरुक्षुं) नाना प्रकार के अन्नों से युक्त और (यः) जो (प्र) भले प्रकार (आदित्यः) अज्ञान का नाश करनेवाला है वह (अनृता, मिनाति) असत्यवादियों को दण्ड देता और (शूरः) शूरवीरों को (अमिता, वसूनि, दयते) यथेष्ट धन देता है (अस्मे) कृपा करके हमें भी ऐश्वर्य्ययुक्त करें ।।

भावार्थ—परमात्मा उपदेश करते हैं कि हे मनुष्यो ! तुम सबप्रकार के ऐश्वर्य्य तथा धन की याचना उसी परमात्मा से करो, क्योंकि वही परमैश्वर्य्ययुक्त, नानाप्रकार के अन्नरूप धनों का स्वामी और वही सब संसार को यथाभाग देनेवाला है, वह अनृतवादियों को दण्ड देता और

धर्मात्मा शूरवीरों को यथेष्ट धन का स्वामी बनाता है, इसलिए उचित है कि सब प्रजाजन सत्यपरायण होकर परमात्मा से ही धन की प्रार्थना करें ॥४॥

इयमिन्द्रं वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना ।
सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः ॥५॥

इयं । इन्द्रं । वरुणं । अष्ट । मे । गीः । प्र । आवत् । तोके । तनये । तूतुजाना । सुऽरत्नासः । देवऽवीतिं । गमेम । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥५॥

पदार्थः—(मे) मम (इयम्) इयमुच्चार्यमाणा (गीः) वेदवाग् (इन्द्रं वरुणम्) सर्वैश्वर्यशालिनं सर्वैः संभजनीयं च परमात्मानम् (अष्ट) अश्नुताम् व्याप्नोतु (तूतुजाना) मया प्रेर्यमाणेयं वाणी (तोके) पुत्रे (तनये) पौत्रे च विषये (प्र, आवत्) प्ररक्षतु, वयं च (सुरत्नासः) शोभनधनसम्पन्नाः सन्तः (देववीतिम्) विदुषां यज्ञशालां (गमेम) प्राप्नुयाम, हे भगवन् ! (यूयम्) भवन्तः (नः) अस्मान् (स्वस्तिभिः) आशीर्वाग्भिः (सदा) निरन्तरं (पात) रक्षन्तु ॥

चतुरशीतितमं सूक्तं षष्ठो वर्गश्च समाप्तः ॥

पदार्थ—(मे) मेरी (इयं) यह (गीः) वेदरूप वाणी (इन्द्रं, वरुणं) सर्वैश्वर्य्ययुक्त तथा सर्वोपरि परमात्मा को (अष्ट) प्राप्त हो (तूतुजाना) यह ईश्वरीयवाणी (तोके) पुत्र (तनये) पौत्र के लिए (प्र, आवत्) भले प्रकार रक्षा करे, और हम लोग (सुरत्नासः) धनादि ऐश्वर्य्य-सम्पन्न होकर (देववीतिं) विद्वानों की यज्ञशालाओं को (गमेम) प्राप्त हों, और हे परमात्मन् ! (यूयं) आप (नः) हमको (स्वस्तिभिः) आशीर्वादरूप वाणियों से (सदा) सदा (पात) पवित्र करें ॥

भावार्थ—इस मन्त्र में यजमान की ओर से प्रार्थना कथन की गई है कि हे भगवन् ! हमारा किया हुआ स्वाध्याय तथा वैदिककर्मों का अनुष्ठान, यह सब आप ही का यश है, क्योंकि इन्हीं कर्मों के अनुष्ठान से हमारे पुत्र पौत्रादि सन्तानों की वृद्धि होती और हम ऐश्वर्य्य-सम्पन्न होकर आपके भक्तिभाजन बनते हैं अर्थात् वैदिककर्मों के अनुष्ठान द्वारा ही मनुष्य को पुत्र पौत्रादि सन्तति प्राप्त होती और इसी से धनादि ऐश्वर्य्य की वृद्धि होती है, इसलिए जिज्ञासुओं को उचित है कि वह धनप्राप्ति तथा ऐश्वर्य्यवृद्धि के लिए वैदिक कर्मों का निरन्तर अनुष्ठान करें और सन्तति अभिलाषियों के लिए भी यही कर्म उपादेय है ॥

८४वां सूक्त और छठवां वर्ग समाप्त हुआ ।

अथ पञ्चर्चस्य पञ्चाशीतितमस्य सूक्तस्य—

१–५ वसिष्ठ ऋषिः ।। इन्द्रावरुणौ देवते ।। छन्दः—१, ४ आर्षीत्रिष्टुप् ।। २, ३, ५ निचृत्त्रिष्टुप् ।। धैवतः स्वरः ।।

अथ राजधर्म्ममुपदिशन् सैनिकसाहाय्यं वर्ण्यते—

अब राजधर्म का वर्णन करते हुए सैनिक पुरुषों के सहायार्थ सोमादि द्रव्यों का प्रदान कथन करते हैं—

पुनीषे वामरक्षसं मनीषां सोममिन्द्राय वरुणाय जुह्वत् ।
घृतप्रतीकामुषसं न देवीं ता नो यामन्नुरुष्यतामभीके ॥१॥

पुनीषे । वां । अरक्षसं । मनीषां । सोमं । इन्द्राय । वरुणाय । जुह्वत् । घृतऽप्रतीकां । उषसं । न । देवीं । ता । नः । यामन् । उरुष्यतां । अभीके ॥१॥

पदार्थः—भो मनुष्याः ! यूयम् (अभीके) अत्र धर्म्ये युद्धे (इन्द्रस्य, वरुणस्य) इन्द्रसम्बन्धि च (सोमं जुह्वत्) सोमाख्यं हविर्ददतः इदं प्रार्थयध्वम्-यत् (वां) युवयोः (अरक्षसम्) आसुरभावं त्यक्त्वा (घृतप्रतीकाम्) घृतसदृशस्निग्धया (मनीषाम्) बुद्ध्या प्रार्थनां कृत्वा (पुनीषे) पुनाम् (उषसम्) उषसा (न) सदृश्या (देवीं) दिव्यस्वरूपया (ता) तया बुद्ध्या (यामन्) युद्धाभिगमे (नः) अस्मान् (उरुस्यताम्) सेवेताम् ।।

पदार्थ—हे मनुष्यो ! तुम (अभीके) इस धर्मयुद्ध में (इन्द्रस्य, वरुणस्य) इन्द्र तथा वरुण के लिए (सोमं, जुह्वत्) सोमरसप्रदान करके यह कथन करो कि (वां) आपको (अरक्षसं) आसुरभावरहित (घृतप्रतीकां) घृत के समान स्नेहवाली (मनीषां) बुद्धिद्वारा प्रार्थना करके (पुनीषे) पवित्र करें (उषसं) उषा के (न) समान (देवीं) दिव्यरूपा (ता) बुद्धिद्वारा (यामन) युद्ध की चढ़ाई के समय (नः) हमको (उरुष्यतां) सेवन करें ।।

भावार्थ—परमात्मा उपदेश करते हैं कि हे प्रजाजनो ! तुम इन्द्र=परमैश्वर्य्ययुक्त शूरवीर तथा वरुण=शत्रुसेना को शस्त्रों द्वारा आच्छादन करनेवाले वीर पुरुषों का सोमादि उत्तमोत्तम पदार्थों से सत्कार करके उन्हें प्रसन्न करते हुए अपनी स्नेहपूर्ण शुद्ध बुद्धि द्वारा सदैव उनकी रक्षा के लिए प्रार्थना करो, जिससे वह शत्रुओं का पराजय करके तुम्हारे लिए सुखदायी हों, तुम युद्ध में चढ़ाई के समय उनके सहायक बनो और उनको सदा प्रेम की दृष्टि से देखो, क्योंकि जहाँ प्रजा राजपुरुषों में परस्पर प्रेम होता है वहाँ सदैव आनन्द बना रहता है, इसलिए तुम दोनों परस्पर प्रेम की वृद्धि करो ।।१।।

अथान्यायकारिणः शत्रून् पराजेतुमुपदिशति—

अब अन्यायकारी शत्रुओं को परास्त करने का उपदेश करते हैं—

स्पर्धन्ते वा उ देवहूये अत्र येषु ध्वजेषु दिद्यवः पतन्ति ।
युवं ताँ इन्द्रावरुणावमित्रान्हतं पराचः शर्वा विषूचः ॥२॥

स्पर्धन्ते । वै । ऊं इति । देवऽहूये । अत्र । येषु । ध्वजेषु । दिद्यवः । पतन्ति । युवं । तान् । इन्द्रावरुणौ । अमित्रान् । हतं । पराचः । शर्वा । विषूचः । ॥२॥

पदार्थः—(इन्द्रावरुणौ) हे इन्द्रावरुणौ ! युवाम् (अमित्रान्) शत्रून् (पराचः) पराजित्य (शर्वा, विषूचः) हिंसकशस्त्रेण तान् कुटिलगतीन् (हतम्) हिंस्तम् तथा (देवहूये) अस्मिन्देवासुरसंङ्ग्रामे (येषु, ध्वजेषु) यासु पताकासु (दिद्यवः, पतन्ति) विपक्षैः क्षिप्तानि शस्त्राणि पतन्ति (वै) निश्चयेन (अत्र) तत्र तादृशस्थले ता रक्षताम् तथा च ये (युवाम्) भवन्तौ प्रति (स्पर्धन्ते) ईर्ष्यन्ति तान् (ऊ) सम्यक् हतम् ।।

पदार्थ—(इन्द्रावरुणौ) हे इन्द्र तथा वरुण ! तुम (अमित्रान्) शत्रुसेना को (पराचः) पराजय करके (शर्वा, विषूचः) हिंसक शस्त्रों से (हतं) उनको हनन करो, और (देवहूये) इस देवासुर संग्राम में (येषु, ध्वजेषु) जिन ध्वजाओं में (दिद्यवः, पतन्ति) शत्रुओं के फेंके हुए शस्त्र गिरते हैं (वै) निश्चय करके (अत्र) उन स्थलों में ध्वजाओं की रक्षा करो, और जो (युवं) तुम दोनों से (स्पर्धन्ते) ईर्षा करते हैं उनका (ऊ) भलीभाँति हनन करो ।।

भावार्थ—इन्द्र = विद्युत् की शक्ति जाननेवाला, वरुण = जलयानों की विद्या जाननेवाला हे विद्युत् तथा जलीय विद्याओं के जाननेवाले सेनाध्यक्षो ! तुम असुर सेना के हनन करने के लिए सदा उद्यत रहो, और युद्ध करते हुए अपनी सेना के झण्डों की बड़े प्रयत्न से रक्षा करो, और अपने साथ ईर्षा करनेवालों को सदा परास्त करते रहो ताकि कोई अन्यायकारी पुरुष तुम्हें कभी दबाकर अन्याय न कर सके, यह तुम्हारे लिए ईश्वरीय आदेश है ।।२।।

आपश्चिद्धि स्वयंशसः सदःसु देवीरिन्द्रं वरुणं देवता धुः ।
कृष्टीरन्यो धारयति प्रविक्ता वृत्राण्यन्यो अंप्रतीनि हन्ति ।।३।।

आपः । चित् । हि । स्वयऽशसः । सदःसु । देवीः । इन्द्रं । वरुणं । देवता । धुरिति धुः । कृष्टीः । अन्यः । धारयति । प्रऽविक्ताः । वृत्राणि । अन्यः । अप्रतीनि । हन्ति ।।३।।

पदार्थः—भोः सेनानीः ! (हि) निश्चयेन (आपः, चित्) सर्वत्र व्याप्य (स्वयशसः) स्वकीयेन यशसा (सदःसु) उपासनीयस्थानेषु (देवीः) दिव्यशक्तिसम्पन्नम् (इन्द्रम्) परमैश्वर्यवन्तम् (वरुणम्) विश्वं स्वशक्त्याऽवस्थापयन्तम् परमात्मानम् (देवता) संप्रार्थ्य तदीय दिव्यशक्तिं (धुः) संधार्य (अन्यः) कश्चित् (कृष्टीः) प्रजाः (धारयति) दधाति, यः (प्रविक्ताः) भिन्नप्रकृतिकानां मनुष्याणां कर्माणि बुध्यते (अन्यः) अन्यः कश्चित् (वृत्राणि) मेघवत् नभोमण्डले प्रसृतान् (अप्रतीनि) वशीकर्तुमशक्यान् (हन्ति) हिनस्ति ।।

पदार्थ—हे सेनाधीश (हि) निश्चय करके (आपः, चित्) सर्वत्र व्यापक होकर (स्वयशसः) अपने यश से (सदःसु) उपासनीय स्थानों में (देवीः) दिव्यशक्तिसम्पन्न (इन्द्रं) परमैश्वर्यवान् (वरुणं) सबको स्वशक्ति में रखनेवाले परमात्मा की (देवता) दिव्यशक्तियों को (धुः) धारण कर (अन्यः) कोई (कृष्टीः) प्रजा को (धारयति) धारण करता है जो (प्रविक्ताः) भिन्न-भिन्न प्रकार के मनुष्यों के कर्मों को जानता है (अन्यः) अन्य (वृत्राणि) मेघों के समान नभोमण्डल में फैले हुए (अप्रतीनि) वश में न आनेवाले शत्रुओं को (हन्ति) हनन करता है ।।

भावार्थ—जो पुरुष परमात्मशक्तियों को धारण करके भिन्न-भिन्न कर्मों के ज्ञाता हैं वह परमैश्वर्य्ययुक्त परमात्मा की उपासना करते हुए न्यायाधीश के पद पर स्थित होते हैं और जो युद्धविद्याविशारद होते हैं वह आकाशस्थ शत्रु की सेना को मेघमण्डल के समान अपने प्रबल वायुसदृश वेग से छिन्नभिन्न करते हैं अर्थात् दिव्यशक्तिसम्पन्न राजपुरुष न्यायाधीश बनकर प्रजा में उत्पन्न हुए दोषों को नाश करके उसको धर्मपथ पर चलाते और दूसरे सेनाधीश बनकर वश में न आनेवाले शत्रुओं को विजय करके प्रजा में शान्ति फैलाते हुए परमात्मा की आज्ञा का पालन करते हैं ॥३॥

स सुक्रतुॠतचिदस्तु होता य आदित्य शवसा वां नमस्वान् ।
आववर्तदवसे वां हविष्मानसदित्स सुविताय प्रयस्वान् ॥४॥

सः । सुऽक्रतुः । ऋतऽचित् । अस्तु । होता । यः । आदित्या । शवसा । वां । नमस्वान् । आऽववर्तत् । अवसे । वां । हविष्मान् । असत् । इत् । सः । सुविताय प्रयस्वान् ॥४॥

पदार्थः—(सः) स पुरुषः (सुक्रतुः) शुभकर्मकर्त्ता (ऋतचित्) तथा सत्यवादी (होता) च पुनः स एव यज्ञकर्ता (अस्तु) अस्तु=स्यात् (यः) यः पुरुषः (आदित्या) आदित्य इव तेजस्वी भूत्वा (शवसा) स्वसामर्थ्येन (वां) इन्द्रावरुणौ (नमस्वान्) लोकोत्तरतेजस्कौ नमस्करणीयौ मन्यते, तथा यः (वाम्) तावेव (अवसे) रक्षायै (आववर्तत्) आवर्तयेत् (हविष्मान्) यश्च हविर्भिर्युक्तो भवति (सः) स पुरुषः (इत्) निश्चयम् (प्रयस्वान्) ऐश्वर्यसम्पन्नो भूत्वा (सुविताय) शोभनफलप्राप्त्यै (असत्) भवतु ॥

पदार्थ—(सः) वह पुरुष (सुक्रतुः) उत्तम कर्मों के करने वाला (ऋतचित्) वही सत्यवादी (होता) वही यज्ञ करनेवाला (अस्तु) है (यः) जो (आदित्या) आदित्य के समान तेजस्वी होकर (शवसा) अपने सामर्थ्य से (वां) इन्द्र तथा वरुणरूप शक्ति को (नमस्वान्) सबसे बड़ी समझता और जो (वां) इन्द्र तथा वरुण शक्ति को (अवसे) रक्षा के लिए (आववर्तत्) वर्ताव में लाता है, और जो (हविष्मान्) सदैव यज्ञादिकर्म करता है (सः) वह (इत्) निश्चय करके (प्रयस्वान्) ऐश्वर्य्ययुक्त होकर (सुविताय) संसार में यशस्वी (असत्) होता है ॥

भावार्थ—इस मन्त्र में परमात्मा उपदेश करते हैं कि हे मनुष्यो ! तुम इन्द्र=विद्युत् तथा वरुण=वायुरूपशक्ति को काम में लाओ, जो इन शक्तियों को व्यवहार में लाता है वह ऐश्वर्य्यसम्पन्न होकर सम्पूर्ण संसार में फैलता अर्थात् उसकी अतुल कीर्ति होती है और वही पुरुष तेजस्वी बनकर अमित्र सेना का हनन करनेवाला होता है ॥४॥

अथोक्तशक्त्यर्थं परमात्मानः प्रार्थ्यते—

अब उक्त शक्तिसम्पन्न होने के लिये परमात्मा से प्रार्थना करते हैं—

इयमिन्द्रं वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना ।
सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः ॥५॥

इयं । इन्द्रं । वरुणं । अष्ट । मे । गीः । प्र । आवत् । तोके । तनये । तूतुजाना । सुऽरत्नासः । देवऽवीतिं । गमेम । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥५॥

पदार्थः—(मे) मदीयां (इयम्) इयमुच्चार्यमाणा (गीः) वेदवाक् (इन्द्रं, वरुणं) इन्द्रावरुणात्मकशक्तिम् (अष्ट) व्याप्नोतु (तूतुजाना) मया प्रेर्यमाणेयं वाणी (तोके, तनये,) पुत्रे पौत्रे च विषये (प्र, आवत्) सम्यग् रक्षतु, वयं च (सुरत्नासः) धनाद्यैश्वर्यसम्पन्नाः सन्तः (देववीतिम्) विदुषां यज्ञशालाम् (गमेम) गच्छेम, हे भगवन् ! (यूयम्) भवान् (नः) अस्मान् (स्वस्तिभिः) आशीर्वाग्भिः (सदा) शश्वत् (पात) रक्षतु ॥

इति पञ्चाशीतितमं सूक्तं सप्तमो वर्गश्च समाप्तः ॥

पदार्थ—(मे) मेरी (इयं) यह (गीः) वेदरूपवाणी (इन्द्रं, वरुणं) इन्द्र तथा वरुणरूप शक्ति को (अष्ट) प्राप्त हो (तूतुजाना) यह प्रार्थनारूप वाणी (तोके, तनये) पुत्र पौत्रों के लिए (प्र, आवत्) भले प्रकार सफल हो, और हम लोग (सुरत्नासः) धनादि ऐश्वर्य्यसम्पन्न होकर (देववीतिं) विद्वानों की यज्ञशालाओं को (गमेम) प्राप्त हों, और हे परमात्मन् ! (यूयं) आप (नः) हमको (स्वस्तिभिः) आशीर्वादरूप वाणियों से (सदा) सदा (पात) पवित्र करें ॥

भावार्थ—हे जगदीश्वर ! हम आपकी कृपा से विद्युत् तथा वायुरूप शक्तियों की विद्या जाननेवाले विद्वानों को सदैव प्राप्त होते रहें अर्थात् ऐसी कृपा करें कि हम उन विद्वानों के संग से उक्त विद्या की वृद्धि द्वारा अपने जीवन को उच्च बनावें और हमारा किया हुआ वेदपाठ तथा यज्ञादि सत्कर्म हमारी सन्तानों को पवित्र करें और आप हमको मङ्गलमय वाणियों से सदैव पवित्र करते रहें, यह हम यजमानों की प्रार्थना है ॥

८५वां सूक्त और ७वां वर्ग समाप्त हुआ ।

अथाष्टर्चस्य षडशीतितमस्य सूक्तस्य—

१—८ वसिष्ठ ऋषिः ॥ वरुणो देवता ॥ छन्दः १, ३, ५, ८ निचृत् त्रिष्टुप् । २, ७ विराट् त्रिष्टुप् । ६ आर्षी त्रिष्टुप् ॥ धैवतः स्वरः ॥

अथ वरुणरूपपरमात्मन उपासनया मनुष्यजन्मनः फलं निरूप्यते—

अब वरुणरूप परमात्मा की उपासना से मनुष्यजीवन की पवित्रता कथन करते हैं—

धीरा त्वस्य महिना जनूंषि वि यस्तस्तम्भ रोदसी चिदुर्वी ।
प्र नाकमृष्वं नुनुदे बृहन्तं द्विता नक्षत्रं पप्रथच्च भूम ॥१॥

धीरा । तु । अस्य । महिना । जनूंषि । वि । यः । तस्तम्भ । रोदसी इति । चित् । उर्वी इति । प्र । नाकं । ऋष्वं । नुनुदे । बृहन्तं । द्विता । नक्षत्रं । पप्रथत् । च । भूम ॥१॥

पदार्थः—(यः) य ईश्वरः (वि) सम्यक् (उर्वी) विस्तीर्णे (रोदसी) द्यावापृथिव्यौ (चित्) निश्चयम् (तस्तम्भ) स्तब्धे अकरोत्, तथा यः (बृहन्तम्) महान्ति (नक्षत्रम्) नक्षत्राणि (च) पुनः (भूम) भूमिम् (पप्रथत्) अररचत् तथा (नाकम्)

स्वर्गम् (ऋष्वम्) नरकं च (द्विता) द्विधा (नुनुदे) व्यररचत् (तु) निश्चयेन (अस्य) इमं वरुणस्वरूपं परमात्मानम् (धीरा) धैर्यवन्तो जनाः (महिना) महत्त्वेन (जनूंषि) तज्जन्मना सह बुध्यन्ते ॥

पदार्थ—(यः) जो परमात्मा (वि) भलीभाँति (रोदसी) द्युलोक (चित्) और (उर्वी) पृथिवी लोक को (तस्तम्भ) थाम्हे हुए है और जो (बृहन्तं) बड़े-बड़े (नक्षत्रं) नक्षत्रों को (च) और (भूम) पृथिवी को (पप्रथत्) रचता, तथा (नाकं) स्वर्ग (ऋष्वं) नरक को (द्विता) दो प्रकार से (नुनुदे) रचता है (तु) निश्चय करके (अस्य) इस वरुणरूप परमात्मा को (धीरा) पुरुष (महिना) महत्त्व द्वारा (जनूंषि) जानते अर्थात् उसके ज्ञान का लाभ करते हैं ॥

भावार्थ—जो परमात्मा इस सम्पूर्ण ब्रह्माण्ड का रचयिता है और जिसने कर्मानुसार स्वर्ग=सुख और नरक=दुःख को रचा है उसके महत्त्व को धीर पुरुष ही विज्ञान द्वारा अनुभव करते हैं, जैसा कि अन्यत्र भी वर्णन किया है कि—

"तस्य योनिं परिपश्यन्ति धीराः ।
तस्मिन् ह तस्थुर्भुवनानि विश्वा" यजु० ॥३१॥१९ ॥

सम्पूर्ण ब्रह्माण्डों की योनि=उत्पत्तिस्थान परमात्मा को धीर पुरुष ही ज्ञान द्वारा अनुभव करते हैं जो सबको अपने वश में किये हुए है, इसी भाव को महर्षि व्यास ने **"योनिश्चेह-गीयते"** ॥ ब्र० सू० १।४।२७॥ में वर्णन किया है कि एकमात्र परमात्मा ही सब भूतों की योनि=निमित्त कारण है, और **"अनीतवातं स्वधया तदेकं"** ॥ ऋग् ० मं. १०।२९।२ ॥ में भलीभाँति वर्णन किया है कि स्वधा=माया=प्रकृति के साथ वह एक है अर्थात् परमात्मा निमित्त कारण और प्रकृति उपादान कारण है इसी भाव को श्वेताश्वरोपनिषद् में इस प्रकार वर्णन किया है कि **"मायान्तु प्रकृतिं विद्यात्, मायिनन्तु महेश्वरं"**=माया को प्रकृति जान अर्थात् माया तथा प्रकृति यह दोनों उस उपादान कारण के नाम हैं और **"मायिनं"** प्रकृतिवाला उस महेश्वर=परमात्मा को जानो, इससे सिद्ध है कि वही परमात्मा इस सम्पूर्ण ब्रह्माण्ड का रचयिता और वही सबका नियन्ता=नियम में चलानेवाला है उसकी महिमा को ज्ञान द्वारा अनुभव करके उसी की उपासना करनी चाहिए, अन्य की नहीं ॥१॥

अथ परमात्मोपासनाप्रकारः कथ्यते—

अब परमात्मा की उपासना का प्रकार कथन करते हैं—

उत स्वया तन्वा३ सं वदे तत्कदा न्व१न्तर्वरुणे भुवानि ।
किं मे हव्यमहृणानो जुषेत कदा मृळीकं सुमना अभि ख्यम् ॥२॥

उत । स्वया । तन्वा । सं । वदे । तत् । कदा । नु । अन्तः । वरुणे । भुवानि । किं । मे । हव्यं । अहृणानः । जुषेत । कदा । मृळीकं । सुऽमनाः । अभि । ख्यम् ॥२॥

पदार्थः—(उत्) किम् (स्वया, तन्वा) स्वशरीरेण (सं) सम्यक् (तत्) तेनोपास्येन सह (वेदे) आलापं करवाणि (कदा) कस्मिन्काले (नु) निश्चयम् (वरुणे, अन्तः) तस्य भजनीयस्य स्वरूपे (भुवानि) प्रविशानि (किं) किमीश्वरः (मे) मम (हव्यम्) उपासनारूपमुपहारम् (अहृणानः) अक्रुध्यन् (जुषेत) स्वीकुर्यात् (कदा) क्व

काले (मृळीकम्) तं सर्वसुखप्रदातारम् (सुमनाः) शोभनमनस्कः (अभि, ख्यम्) अभितः पश्येयम् ॥

पदार्थ—(उत) अथवा (स्वया, तन्वा) अपने शरीर से (सं) भले प्रकार (तत्) उस उपास्य के साथ (वेद) आलाप करूं (कदा) कब (नु) निश्चय करके (वरुण, अन्तः) उस उपास्य देव के स्वरूप में (भुवानि) प्रवेश करूंगा (किं) क्या परमात्मा (मे) मेरी (हव्यं) उपासनारूप भेंट को (अहृणानः) प्रसन्न होकर (जुषेत) स्वीकार करेंगे (कदा) कब (मृळीकं) उस सर्व सुख-दाता को (सुमनाः) संस्कृत मन द्वारा (अभि, ख्यं) सब ओर से ज्ञानगोचर करूंगा ॥

पदार्थ—(इन्द्रवायू) हे विद्युत् और वायुविद्या को जाननेवाले विद्वानो ! (वाम्) आप लोगों को (ईशानाय) जो ईश्वर की विद्या जाननेवाले हैं आपको अभी चारों ओर से (पृक्षः) ऐश्वर्य (सचन्ते) संगत होते हैं और आपके बनाये हुए (रथं) यान (वीरऽवाहम्) वीरता को प्राप्त करनेवाले होते हैं और (ते) वे (सत्येन) सत्य (मनसा) मन से (दीध्यानाः) दीप्त हुए (स्वेन युक्तासः) ऐश्वर्य के साथ जुड़े हुए (क्रतुना) यज्ञों द्वारा (वहन्ति) उत्तम ऐश्वर्य को प्राप्त कराते हैं ।।

भावार्थ—परमात्मा उपदेश करते हैं कि हे मनुष्यो ! विद्युत् विद्या के जाननेवाले तथा वायु आदि सूक्ष्म तत्त्वों के जाननेवाले विद्वान् जिन यानों को बनाते हैं वे यान उत्तम से उत्तम ऐश्वर्यों को प्राप्त कराते हैं और वीर लोगों को नभोमण्डल में ले जानेवाले एकमात्र वही यान कहला सकते हैं, अन्य नहीं ।।५।।

ईशानासो ये दधते स्वर्णो गोभिरश्वेभिर्वसुभिर्हिरण्यैः ।
इन्द्रवायू सूरयो विश्वमायुरर्वद्भिर्वीरैः पृतनासु सह्युः ।।६।।

ईशानासः । ये । दधते । स्वः । नः । गोभिः । अश्वेभिः । वसुऽभिः । हिरण्यैः । इन्द्रवायू इति । सूरयः । विश्वं । आयुः । अर्वत्ऽभिः । वीरैः । पृतनासु । सह्युः ।।६।।

पदार्थः—(इन्द्रवायू) हे विद्युद्वाय्वादिविषयकसूक्ष्मविद्यावेत्तारः ! यूयम् (ईशानासः) ईश्वरतत्परान् ऐश्वर्यवतः कुरुत (ये) येहि (गोभिः) गोभिः साधनैः तथा (अश्वेभिः) अश्वैः साधनैः (वसुभिः) धनैः साधनैः (हिरण्यैः) दीप्तिमद्भिः सुरत्नैश्च (स्वर्ण, दधते) स्वर्णादिसाररत्नानि धारयन्ति (सूरयः) ते च विद्वांसः सन्तः (विश्वम्) पूर्णम् (आयुः) वयः प्राप्नुवन्तु, तथा (अर्वद्भिः, वीरैः) गतिप्रवरैर्वीरैः (पृतनासु) युद्धेषु (सह्युः) पराभवेयुः ।।

पदार्थ—(इन्द्रवायू) हे विद्युत् और वायु आदि तत्त्वों की सूक्ष्मविद्या जाननेवाले विद्वानो ! तुम (ईशानासः) ईश्वरपरायण लोगों को ऐश्वर्यसम्पन्न करो (ये) जो लोग (गोभिः) गौओं द्वारा (अश्वेभिः) अश्वों द्वारा (वसुभिः) धनों द्वारा (हिरण्यैः) दीप्तिमात्र वस्तुओं द्वारा (स्वर्णं दधते) स्वर्णादि रत्नों को धारण करते हैं और (सूरयः) वे शूरवीर लोग (विश्वं) सम्पूर्ण (आयुः) आयु को प्राप्त हों और (अर्वद्भिः वीरैः) वीर सन्तानों से (पृतनासु) युद्धों में शत्रुओं को (सह्युः) परास्त करें ।।

भावार्थ—विद्युत् आदि विद्याओं की शक्तिओं को जाननेवाले विद्वान् ही प्रजाओं को ऐश्वर्यसम्पन्न बना सकते हैं, ऐश्वर्यसम्पन्न होकर ही प्रजा पूर्ण आयु को भोग सकती है, ऐश्वर्य-सम्पन्न लोग ही युद्धों में पर पक्षों को परास्त करते हैं । परमात्मा उपदेश करते हैं कि हे विद्वानों ! तुम सबसे पहिले अपने देश को ऐश्वर्यसम्पन्न करो ताकि तुम्हारी प्रजायें वीर सन्तान उत्पन्न करके शत्रुओं को परास्त करें ।।

जो लोग यह कहते हैं कि वैदिक समय में भारतवर्ष में ऐश्वर्य नहीं था उनको उक्त मन्त्र की रचना पर अवश्य दृष्टि डालनी चाहिये। इस मन्त्र में केवल गौ, घोड़े और धनादि वस्तुओं के ऐश्वर्य का ही वर्णन नहीं किया प्रत्युत (हिरण्य) बड़े बड़े दिव्य रत्नों का वर्णन स्पष्टरीति से उक्त मन्त्र में किया गया है, इतना ही नहीं किन्तु स्वर्ण शब्द भी इसमें स्पष्ट रीति से आया है जिसमें किसी को भी विवाद नहीं ॥

वेदों में एक प्रकार के ऐश्वर्य की तो कथा ही क्या किन्तु नाना प्रकार के ऐश्वर्यों का वर्णन पाया जाता है जैसा कि मं० २ सू० १५ मन्त्र ३ में रत्नों के धारण करने का उपदेश है। इसी प्रकार मं० १ सू० २० मन्त्र १ में रत्नों का वर्णन है। एक दो उदाहरणों से क्या सहस्रों मन्त्र वेदों में ऐसे पाये जाते हैं जिनमें रत्नादि निधियों का विस्तारपूर्वक वर्णन किया गया है। बहुत क्या ऋग्वेद के पहिले मन्त्र में ही अग्नि को "रत्नधातमम्" का विशेषण दिया गया है; अर्थात् भौतिक अग्नि वा परमात्मा नाना प्रकार के रत्नों को धारण करनेवाले हैं, इसी भाव का उपदेश इस मन्त्र में है कि परमात्मा ईश्वरपरायण लोगों को नाना प्रकार की निधियों का स्वामी बनाता है किन्तु केवल ईश्वर अविश्वासी और उद्योगरहित लोगों को नहीं किन्तु कर्मयोगी और ईश्वरविश्वासी लोगों को ईश्वर ऐश्वर्यसम्पन्न करता है, इसी अभिप्राय से परमात्मा ने इस मन्त्र में विद्युदादि विद्याओं के वेत्ता कर्मयोगी पुरुषों का वर्णन किया है ॥६॥

सम्प्रति परमात्मा सूक्ष्मताविज्ञैः जनरक्षां कल्याणं चोपदिशति—

अब परमात्मा सूक्ष्मविद्या वेत्ता विद्वानों द्वारा प्रजा की रक्षा तथा कल्याण का उपदेश करते हैं—

अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः ।
वाजयन्तः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ॥७॥१२॥

अर्वन्तः । न । श्रवसः । भिक्षमाणाः । इन्द्रवायू इति । सुस्तुतिऽभिः । वसिष्ठाः । वाजऽयन्तः । सु । अवसे । हुवेम । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥७॥१२॥

पदार्थः—भो नरः ! (वाजयन्तः) बलमिच्छन्तो यूयम् (स्ववसे) स्वरक्षणाय प्रार्थयध्वम् यत् (वयम्) वयं सर्वे (हुवेम) विदुष आहूय स्वयज्ञे वक्ष्यमाणं प्रार्थयामहै किं च (यूयम्) भो विद्वांसो ! यूयम् (स्वस्तिभिः) स्वस्तिवाग्भिः (नः) अस्मान् (सदा) निरन्तरम् (पात) रक्षतेति, परन्तु (अर्वन्तः, न) कर्मयोगिन इव (श्रवसः) अन्नादीन् (भिक्षमाणाः इच्छतः नः) तथा (इन्द्रवायू) कर्मयोगिज्ञानयोगिनोरुभयोरपि (सुष्टुतिभिः) शोभनस्तवनैः (वसिष्ठाः) वसिष्ठाः भवन्तो यूयं कल्याणं प्रार्थयध्वम् ॥७॥

इति नवतितमं सूक्तं द्वादशो वर्गश्च समाप्तः ।

पदार्थ—हे लोगो ! (वाजयन्तः) बल की इच्छा करते हुए तुम (स्ववसे) अपनी रक्षा के लिये यह प्रार्थना करो कि (वयं) हमलोग (हुवेम) विद्वानों को अपने यज्ञों में बुलायें और यह कहें कि (यूयं) आप लोग (स्वस्तिभिः) स्वस्तिवाचनों से (नः) हमारी (सदा) सदा के लिये (पात) रक्षा करें परन्तु (अर्वन्तः) कर्मयोगियों के (न) समान (श्रवसः) अन्नादि पदार्थों को (भिक्षमाणाः) चाहते हुए और (इन्द्र-वायू) कर्मयोगी और ज्ञानयोगी दोनों प्रकार के विद्वानों

की सुष्टुतिभिः) सुन्दर स्तुतियों द्वारा (वसिष्ठाः) वसिष्ठ हुए आप लोग विद्वानों से कल्याण की प्रार्थना करें ।।

भावार्थ—जो लोग वेदवेत्ता विद्वानों से उपदेश लाभ करते हैं वे ही बल तथा ऐश्वर्यसम्पन्न होकर अपना और अपने देश का कल्याण कर सकते हैं, अन्य नहीं ।।७।।

९० सूक्त और १२वां वर्ग समाप्त हुआ ।

अथ सप्तर्चस्य एकनवतितमस्य सूक्तस्य

१–७ वसिष्ठ ऋषिः ।। १–३ वायुः । २, ४–७ इन्द्रवायू देवते ।। छन्दः–१, ४, ७ विराट् त्रिष्टुप् ।। २, ५, ६ आर्षी त्रिष्टुप् । ३ निचृत् त्रिष्टुप् ।। धैवतः स्वरः ।।

अथ पूर्वोक्तविद्वद्भ्यः प्रकारान्तरेण विद्याऽऽदानमुपदिश्यते—

अब उक्त विद्वानों से प्रकारान्तर से विद्याग्रहण करने का उपदेश कथन करते हैं—

**कुविदङ्ग नमसा ये वृधासः पुरा देवा अनवद्यास आसन् ।
ते वायवे मनवे बाधितायावासयन्नुषसं सूर्येण ॥१॥**

कुवित् । अङ्ग । नमसा । ये । वृधासः । पुरा । देवाः । अनवद्यासः । आसन् । ते । वायवे । मनवे । बाधिताय । अवासयन् । उषसं । सूर्येण ॥१॥

पदार्थः—(पुरा) पूर्वकाले (ये) ये (देवाः) विद्वांसः (वृधासः) ज्ञानवृद्धाः तथा (अनवद्यासः) दोषरहिताः (आसन्) अभूवन् ते (कुवित्) अति (अङ्ग) शीघ्रम् (नमसा) नम्रतया (वायवे, मनवे) शिक्षाप्राप्तये (बाधिताः) स्वसन्तानरक्षणाय च (सूर्येण) सूर्योदये (उषसम्) उषःकालमभिलक्ष्य (अवासयन्) स्वयज्ञादिकं प्रारप्सत ।।

पदार्थ—(पुरा) पूर्वकाल में (ये) जो (देवाः) विद्वान् (वृधासः) ज्ञानवृद्ध और (अनवद्यासः) दोषरहित (आसन्) थे, वे (कुवित्) बहुत (अङ्ग) शीघ्र (नमसा) नम्रता से (वायवे) शिक्षा के (मनवे) लाभ के लिये (बाधिताः) स्वसन्तानों की रक्षा के लिये (सूर्येण) सूर्योदय के (उषसम्) उषाकाल को लक्ष्य रख कर (अवासयन्) अपने यज्ञ आदि कर्मों का प्रारम्भ करते थे ।।

भावार्थ—जो लोग आलस्य आदि दोषरहित और ज्ञानी हैं, वे उषाकाल में उठ कर अपने यज्ञादि कर्मों का प्रारम्भ करते हैं । मन्त्र में जो भूतकाल की क्रिया दी है वह **"व्यत्ययो बहुलम्"** इस नियम के अनुसार वर्तमान काल की बोधिका है इसलिये वेदों से प्रथम किसी अन्य देव के होने की आशङ्का इससे नहीं हो सकती । अन्य युक्ति यह कि **"सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्" "देवाभागं यथा पूर्वे सञ्जानाना उपासते"** इत्यादि मन्त्रों में पूर्व काल के देवों की सूचना जैसे दी गई है इसी प्रकार उक्त मन्त्र में भी है, इसलिये कोई दोष नहीं ।।

तात्पर्य यह है कि वैदिक सिद्धान्त में सृष्टि प्रवाहरूप से अनादि है इसलिये उसमें भूतकाल का वर्णन करना कोई दोष की बात नहीं ॥१॥

उशन्ता दूता न दभाय गोपा मासश्च पाथः शरदश्च पूर्वीः । इन्द्रवायू सुष्टुतिर्वामियाना मार्डीकमीट्टे सुवितं च नव्यम् ॥२॥

उशन्ता । दूता । न । दभाय । गोपा । मासः । च । पाथः । शरदः । च । पूर्वीः । इन्द्रवायू इति । सुऽस्तुतिः । वां । इयाना । मार्डीकं । ईट्टे । सुवितं । च । नव्यम् ॥२॥

पदार्थः—(इन्द्रवायू) हे कर्मज्ञानयोगसम्पन्ना विद्वांसः ! (उशन्ता) अस्मत्कल्याणं वाञ्छन्तः (दूता) शुभमार्गस्य दर्शितारः (न) इव (दभाय) अस्मत्कल्याणाय (गोपाः) नो रक्षका भवन्तो भवन्तु (शरदश्च पूर्वीः) बहूनि वर्षाणि यावत् (पाथः) अस्मत्सन्मार्गम् (मासश्च) शुभसमयं च रक्षन्तु (सुस्तुभिः) अस्मत्कृता शोभनस्तुतिः (वाम्) युष्मान् (इयाना) प्राप्नुवती सती (मार्डीकम्) सुखम् (ईट्टे) प्रार्थयते (च) तथा च (नव्यम्) नूतनम् (सुवितम्) सुष्ठु प्राप्यं धनं च याचते ॥

पदार्थ—(इन्द्रवायू) हे कर्मयोग और ज्ञानयोगसम्पन्न विद्वानो ! (उशन्ता) आप हमारे कल्याण की इच्छा करते हुए (दूता) शुभ मार्ग दिखलानेवाले दर्शक के (न) समान (दभाय) हमारे कल्याण के लिये (गोपाः) आप हमारे रक्षक बनें (शरदश्च पूर्वीः) और अनन्त काल तक (पाथः) हमारे शुभ मार्ग की ओर (मासश्च) शुभ समयों की आप रक्षा करें (सुऽस्तुतिः) हमारी स्तुति (वाम्) आप लोगों को (इयाना) प्राप्त होती हुई (मार्डीकम्) सुख की (ईट्टे) याचना करती है (च) और (नव्यं) नवीन (सुवितं) धन की याचना करती है ॥

भावार्थ—परमात्मा उपदेश करते हैं कि जो लोग कर्मयोगी और ज्ञानयोगी विद्वानों को अपना नेता बनाते हैं वे सुख को प्राप्त होते हैं और उनको नवीन से नवीन धनादि वस्तुओं की सदैव प्राप्ति होती है ॥३॥

पीवोअन्नाँ रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः । ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ॥३॥

पीवःऽअन्नान् । रयिऽवृधः । सुऽमेधाः । श्वेतः । सिसक्ति । निऽयुतां । अभिऽश्रीः । ते । वायवे । सऽमनसः । वि । तस्थुः । विश्वा । इत् । नरः । सुऽपत्यानि । चक्रुः ॥३॥

पदार्थः—(सुमेधाः) ज्ञानयोगिनो नरः (पीवः, अन्नान्) पुष्टतराण्यन्नानि लभन्ते (रयिवृधः) ऐश्वर्यसम्पन्नाश्च भवन्ति (श्वेताः) सुकर्माणि च (सिसक्ति) सेवन्ते (अभि, श्रीः) शोभा (नियुताम्) या नरेषु नियुक्ता ताम् प्राप्नुवन्ति, तथा (ते, समनसः) ते स्वायत्तीकृतमानसाः (वायवे) विज्ञानाय (तस्थुः) संतिष्ठन्ते (विश्वा, इत्, नरः) इत्थं सर्वे नराः (स्वपत्यानि) शुभकर्माणि (चक्रुः) कुर्वन्ति ॥

पदार्थ—(सुमेधाः) ज्ञानयोगी पुरुष (पीवोऽन्नान्) पुष्ट से पुष्ट अन्नों को लाभ करते हैं (रयिवृधः) और ऐश्वर्यसम्पन्न होते हैं (श्वेतः) और उत्तम कर्मों को (सिसक्ति) सेवन करते हैं

(अभिश्रीः) शोभा (नियुतां) जो मनुष्य के लिये नियुक्त की गई है उसको प्राप्त होते हैं तथा (ते, समनसः) वे वशीकृत मनवाले (वायवे) विज्ञान के लिये अर्थात् ज्ञानयोग के लिये (तस्थुः) स्थिर होते हैं (विश्वेन्नरः) ऐसे सम्पूर्ण मनुष्य (स्वपत्यानि) शुभ कर्मों को (चक्रुः) करते हैं ॥

भावार्थ—जो पुरुष ज्ञानयोगी बन कर बुद्धिरूपी श्री को उत्पन्न करते हैं वे संयमी पुरुष ही कर्मयोगी बन सकते हैं, अन्य नहीं ॥

तात्पर्य यह है कि जिन पुरुषों के अपना मन वशीभूत है वे ही पुरुष कर्मयोग और ज्ञानयोग के अधिकारी होते हैं, अन्य नहीं, इस भाव को उपनिषदों में इस प्रकार वर्णन किया है कि—

"यस्तु विज्ञानवान्भवति समनस्कः सदा शुचिः ।
स तु तत्पदमाप्नोति यस्माद्भूयो न जायते" ॥कठ० ३ ।८॥

जो पुरुष समनस्क वशीकृत मनवाला होता है वही विज्ञानवान् ज्ञानयोगी और शुभ कर्मों द्वारा पवित्र अर्थात् कर्मयोगी बन सकता है, फिर वह प्राकृत संसार में नहीं आता ॥

समनस्क, समनस और वशीकृतमन, संयमी ये सब एकार्थवाची शब्द हैं और इनका तात्पर्य कर्मयोग और ज्ञानयोग में है । इस प्रकार उक्त मन्त्र में कर्मयोग और ज्ञानयोग का वर्णन किया है ॥३॥

यावत्तरस्तन्वो३ यावदोजो यावन्नरश्चक्षसा दीध्यानाः ।
शुचिं सोमं शुचिपा पातमस्मे इन्द्रवायू सदतं बर्हिरेदम् ॥४॥

यावत् । तरः । तन्वः । यावत् । ओजः । यावत् । नरः । चक्षसा । दीध्यानाः । शुचिं । सोमं । शुचिऽपा । पातं । अस्मे इति । इन्द्रवायू इति । सदतं । बर्हिः । आ । इदम् ॥४॥

पदार्थः—(इन्द्रवायू) हे कर्मयोगिनः ज्ञानयोगिनश्च ! यूयम् मम यज्ञेष्वागत्य (इदम्) अस्मिन् (बर्हिः) आसने (आसदतम्) उपविशत तथा च (यावत्) यावत् कालपर्यन्तम् (तन्वः) अस्मच्छरीरे (तरः) स्फूर्तिरस्ति तावत् तथा (यावत्) यावत्कालपर्यन्तम् (ओजः) ब्रह्मचर्यप्रभावोऽस्ति तथा (यावत्, नरः, चक्षसः) यावद्वयम् नरा ज्ञानिनः स्मः (दीध्यानाः) दीप्तिमन्तश्च स्मः तावत् (अस्मे) अस्माकम् (सोमम्) स्वभावम् (शुचिम्) पवित्रं कुरुत, यतः (शुचिपाः) यूयम् शुचिकर्मणां रक्षितारः स्थ अतएव (पातं) सर्वथा यज्ञेष्वागत्य रक्षत ॥

पदार्थ—(इन्द्रवायू) हे कर्मयोगी और ज्ञानयोगी पुरुषो ! तुम लोग हमारे यज्ञों में आकर (इदम्) इस (बर्हिः) आसन पर (आसदतम्) बैठो और (यावत्) जब तक (तन्वः) हमारे शरीर में (तरः) स्फूर्ति है तब तक और (यावत्) जब तक (ओजः) ब्रह्मचर्य का प्रभाव है और (यावन्नरः, चक्षसः) हम ज्ञानी हैं (दीध्यानाः) दीप्तिवाले हैं तब तक आप (अस्मे) हमारे (सोमं) स्वभाव को (शुचिं) पवित्र बनायें क्योंकि (शुचिपा) आप हमारे शुभ कर्मों की रक्षा करनेवाले हैं इसलिये (पातं) आप हमारे यज्ञों में आकर हमको पवित्र करें ॥

भावार्थ—जब तक मनुष्य के शरीर में कर्म करने की शक्ति रहती है और जब तक ब्रह्मचर्य के प्रभाव से उत्पन्न हुआ ओज रहता है और जब तक सत्य के समझने की शक्ति रहती

है तब तक उसे ज्ञानयोगी और कर्मयोगी पुरुषों से सदैव यह प्रार्थना करनी चाहिये कि हे भगवन्, आप मेरे समक्ष आकर मुझे सत्कर्मों का उपदेश करके साधु स्वभाववाला बनाइये ।

जो लोग यह शङ्का किया करते हैं कि वेदों में सदाचार का उपदेश नहीं उनको ऐसे सदाचार के बोधक उक्त मन्त्रों पर अवश्य ध्यान देना चाहिये । वेद में ऐसे सहस्रों मन्त्र हैं जिनमें केवल सदाचार की शिक्षा का वर्णन किया गया है ।।४।।

नियुवाना नियुतः स्पार्हवीरा इन्द्रवायू सरथं यातमर्वाक् ।
इदं हि वां प्रभृतं मध्वो अग्रमध प्रीणाना वि मुमुक्तमस्मे ॥५॥

निऽयुवाना । निऽयुतः । स्पार्हऽवीराः । इन्द्रवायू इति । सऽरथं । यातं । अर्वाक् । इदं । हि । वां । प्रऽभृतं । मध्वः । अग्रं । अध । प्रीणाना । वि । मुमुक्तं । अस्मे इति ।।५।।

पदार्थः—(इन्द्रवायू) **"इदंकरणादित्याग्रयणः"** ।। नि० १०, ८, ९ ।। अर्थात् सर्वकर्मसु व्यापकः **'वाति सर्वं जानातीति वायुः'**, हे कर्मयोगिनः ज्ञानयोगिनः विद्वांसः ! (अर्वाक्) अस्मदभिमुखम् (सरथम्) स्वज्ञानयोगकर्मयोगमार्गमभिलक्ष्य (यातम्) आगच्छन्तु (स्पार्हवीराः) भवन्तः सर्वैरभिलषणीया अतः (नियुवाना) उपदेशे नियुक्ताः (नियुतः) यश्च स्वयोगमार्गस्तमुपदिशत (वाम्) युष्मभ्यमेव (मध्वः) मधुरः (इदम्) अयम् (अग्रम्) मुख्यः सारभूतः उपह्रियते तं गृह्णीत (अथ) अन्यच्च (प्रीणाना) प्रसन्नाः सन्तः (अस्मे) अस्मान् (वि, मुमुक्तम्) बन्धनान्मोचयत ।।

पदार्थ—(इन्द्रवायू) "इदङ्करणादित्याग्रयणः" ।। नि० १०, ८, ९ ।। अर्थात् सब कर्मों में जो व्याप्त हो उसे इन्द्र कहते हैं "वातीतिवायुः" जो सर्व विषय को जानता है वह वायु है । हे कर्मयोगी और ज्ञानयोगी पुरुषो ! (अर्वाक्) हमारे सम्मुख (सरथं) अपने कर्मयोग और ज्ञानयोग के मार्ग को लक्ष्य मानते हुए (यातं) हमारे सामने आयें (स्पार्हवीराः) आप सर्वप्रिय हैं और (नियुवाना) उपदेश के मार्ग में नियुक्त किये गये हैं और (नियुतः) जो तुम्हारा योगमार्ग है उसका आकर हमें उपदेश करो (वाम्) तुम्हारे लिये ही निश्चय करके (मध्वः) मीठे पदार्थ का (इदम्) ये (अग्रम्) सार भेंट किया जाता है आप इसे ग्रहण करें (अथ) और (प्रीणाना) प्रसन्न हुए आप (अस्मे) हम लोगों को (विमुमुक्तम्) पापरूपी बन्धनों से छुड़ायें ।।

भावार्थ—यजमान कर्मयोगी और ज्ञानयोगी विद्वानों से यह प्रार्थना करते हैं कि हे भगवन् ! आप हमारे यज्ञों में आकर हमको कर्मयोग तथा ज्ञानयोग का उपदेश करें ताकि हम उद्योगी तथा ज्ञानी बन कर निरुद्योगिता और अज्ञानरूपी पापों से छूट कर मोक्ष फल के भागी बनें ।।५।।

या वां शतं नियुतो याः सहस्रमिन्द्रवायू विश्ववाराः सचन्ते ।
आभिर्यातं सुविदत्राभिरर्वाक्पातं नरा प्रतिभृतस्य मध्वः ॥६॥

याः । वां । शतं । निऽयुतः । याः । सहस्रं । इन्द्रवायू इति । विश्वऽवाराः । सचन्ते । आ । आभिः । यातं । सुऽविदत्राभिः । अर्वाक् । पातं । नरा । प्रतिऽभृतस्य । मध्वः ।।६।।

पदार्थः—(इन्द्रवायू) हे ज्ञानयोगिनः कर्मयोगिनश्चः कर्मयोगिनश्च ! (वाम्) युष्मान् (याः) ये यूयम् (विश्ववाराः) विश्वैर्वरणीयास्तान् (याः) ये नराः (शतम्) शतशः (सहस्रम्) सहस्रशश्च (नियुतः) नियुक्ताः (सचन्ते) सेवन्ते ते सङ्गतिं प्राप्नुवन्ति (नरा) हे वैदिक नरः ! (अर्वाक्) अस्मदभिमुखम् (आभिः) एभिः (सुविदत्राभिः) शोभमार्गैः (यातम्) आगच्छत तथा (मध्वः प्रतिभृतस्य) भवदर्थे निहितं मधुरं रसम् (पातम्) पिबत ।।

पदार्थ—(इन्द्रवायू) हे ज्ञानयोगी और कर्मयोगी पुरुषो ! (वाम्) तुम लोगों को (याः) जो आप (विश्ववाराः) सबके वरणीय हो ऐसे आपको (याः) जो लोग (शतम्) सैकड़ों वार (सहस्रं) सहस्रों वार (नियुतः) नियुक्त हुए (सचन्ते) सेवन करते हैं वे सङ्गति को प्राप्त होते हैं इसलिये (नरा) वैदिक मार्ग के नेता लोगो ! (अर्वाक्) हमारे सम्मुख (आभिः) सुन्दर मार्गों से (यातं) आओ और (मध्वः, प्रतिभृतस्य) आपके निमित्त जो मीठा रस रक्खा गया है इसे आकर (पातं) पिओ ।।

भावार्थ—जो लोग कर्मयोगी और ज्ञानयोगी पुरुषों की सैकड़ों और सहस्रों वार संगति करते हैं वे लोग उद्योगी और ब्रह्मज्ञानी बन कर जन्म के धर्म, अर्थ, काम, मोक्ष रूपी चारों फलों को प्राप्त होते हैं ।।६।।

अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः ।
वाजयन्तः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ।।७।।

अर्वन्तः । न । श्रवसः । भिक्षमाणाः । इन्द्रवायू इति । सुस्तुतिऽभिः । वसिष्ठाः । वाजऽयन्तः । सु । अवसे । हुवेम । यूयं । पात । स्वस्तिऽभिः । सदा । नः ।।७।।

पदार्थः—(इन्द्रवायू) हे पूर्वोक्तयोगद्वयविशिष्टाः ! वयम् (अर्वन्तः) जिज्ञासवः (न) इव (श्रवसः) ज्ञानम् (भिक्षमाणाः) याचमानाः (सुस्तुतिभिः, वसिष्ठाः) युष्मत्स्तुतितत्पराः (स्ववसे) स्वरक्षणाय (वाजयन्तः) बलं कामयमानाः (हुवेम) शब्दयामहे याचामहे (यूयम्) यूयम् सर्वे (स्वस्तिभिः) स्वस्तिवाग्भिः (सदा) शश्वत् (नः) अस्मान् (पात) रक्षत ।।

एकोननवतितमं सूक्तं त्रयोदशो वर्गश्च समाप्तः ।

पदार्थ—(इन्द्रवायू) हे ज्ञानयोगी और कर्मयोगी पुरुषो ! हम (अर्वन्तः) जिज्ञासुओं के (न) समान (श्रवसः) ज्ञान की (भिक्षमाणाः) भिक्षा मांगते हुए (सुस्तुतिभिः, वसिष्ठाः) आपकी स्तुतिपरायण हुए अपनी रक्षा के लिये (वाजयन्तः) आपसे बल की याचना करते हैं और (हुवेम) ह्वेञ् शब्दार्थक धातु होने से यहां याच्ञाविषयक शब्दार्थ हैं" हम यह दान मांगते हैं कि (यूयं) आप (स्वस्तिभिः) स्वस्तिवाचनों से (नः) हमारी (सदा) सदैव (पात) रक्षा करें ।।

भावार्थ—जो लोग ज्ञान और विज्ञान के भिक्षु बन कर ज्ञानी और विज्ञानी लोगों से सदैव ज्ञानयोग और कर्मयोग की भिक्षा मांगते हैं, परमात्मा उनको अभ्युदय और निःश्रेयस इन दोनों ऐश्वर्यों से परिपूर्ण करता है ।।७।।

।। ९१ सूक्त और १३ वर्ग समाप्त हुआ ।।

अथ पञ्चर्चस्य द्वानवतितमस्य सूक्तस्य—

१–५ वसिष्ठ ऋषिः ॥ १, ३, ५ वायुः । २ इन्द्रवायू देवते ॥ छन्दः १ निचृत् त्रिष्टुप् २, ३, ४ विराट् त्रिष्टुप् । ५ आर्षी त्रिष्टुप् ॥ धैवतः स्वरः ॥

अथ सोमरसपानार्थं कर्मयोगिनो यज्ञेष्वाह्वानमुपदिश्यते—

अब कर्मयोगी पुरुष को सोमरस पीने के लिये बुलाना कथन करते हैं—

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम् ॥१॥

आ । वायो इति । भूष । शुचिऽपाः । उप । नः । सहस्रं । ते । निऽयुतः । विश्वऽवार । उपो इति । ते । अन्धः । मद्यं । अयामि । यस्य । देव । दधिषे । पूर्वऽपेयम् ॥१॥

पदार्थः—(वायो) हे कर्मयोगिन् ! भगवन् अस्मद्यज्ञम् (आ, भूष) आगत्य भूषयतु (शुचिपाः) शुचिपदार्थस्यपाताऽस्ति (विश्ववार) हे लोकभजनीय ! (ते) तव (सहस्रं, नियुतः) अनेकधा कर्मप्रकाराः सन्ति (नः) अस्माकम् (अन्धः) अन्नादिकैः (मद्यम्) आह्लादनीयं सोमरसम् (उप, अयामि) पात्रे निदधामि (देव) हे दिव्यशक्तिमन् ! (पूर्वपेयम्) भवतैव पूर्वपेयमिमं रसं (दधिषे) गृह्णातु ॥

पदार्थ—(वायो) हे कर्मयोगिन् "वाति = गच्छति स्वकर्मणा ऽभिप्रेतं प्राप्नोतीति वायुः" जो कर्मों द्वारा अपने कर्तव्यों को प्राप्त हो उसको वायु कहते हैं "वायुर्वातेर्वेतेर्वा स्याद्गतिकर्मणः" वायु शब्द गतिकर्मवाली धातुओं से सिद्ध होता है (निरुक्त दैवत काण्ड १०-३) । इस प्रकार यहां वायु का नाम कर्मयोगी का है । हे कर्मयोगिन् ! आप आकर हमारे यज्ञ को (आभूषः) विभूषित कीजिये और (शुचिपाः) आप पवित्र वस्तुओं का पान करनेवाले हैं । (विश्ववारः) आप सबके वरणीय हैं (ते) तुम्हारे (सहस्रं नियुतः) हजारों कर्म के प्रकार हैं (नः) हमारा (अन्धः) अन्नादि वस्तुओं से (मद्यम्) आह्लादक जो सोमरस है उसको (उपअयामि) मैं पात्र में रखता हूं (देव) हे दिव्यशक्तिवाले विद्वन् ! (पूर्वऽपेयं) पहिले पीने योग्य इसको (दधिषे) तुम धारण करो ॥

भावार्थ—यजमान लोग अपने यज्ञों में कर्मयोगी पुरुषों को बुलाकर उत्तमोत्तम अन्नादि-पदार्थों के आह्लादकरस उनकी भेंट करके उनसे सदुपदेश ग्रहण करें, वायु शब्द से इस मन्त्र में कर्मयोगी का ग्रहण है किसी वायुतत्व या किसी अन्य वस्तु का नहीं, यद्यपि वायु शब्द के अर्थ कहीं ईश्वर के कहीं वायुतत्त्व के भी हैं तथापि यहां प्रसङ्ग से वायु शब्द कर्मयोगी का बोधक है क्योंकि इसके उत्तर मन्त्र में "शचीभिः" इत्यादिक कर्मबोधक वाक्यों से कर्मप्रधान पुरुष का ही ग्रहण है और जहां **"वायवा याहि दर्शते इमे सोमा अरं कृता"** ॥१।२।१॥ इत्यादि मन्त्रों में वायु शब्द से ईश्वर का ग्रहण किया है वहां ईश्वर का प्रसङ्ग पूर्वोक्त सूक्तों की संगति से वायु शब्द ईश्वर का प्रतिपादक है अर्थात् **"अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्"** ॥१।१।१॥ इस ईश्वर प्रकरण में पढ़े जाने के कारण वहां वायु शब्द ईश्वर का बोधक है, क्योंकि "शन्नो

मित्रः शं वरुणः" ।। तैत्तिरीय ब्रा. १ ।। इस मन्त्र में वायु शब्द ईश्वर के प्रकरण में पढ़ा गया है। जिस प्रकार वहां ईश्वर प्रकरण है इसी प्रकार यहां विद्वानों से शिक्षालाभ करने के प्रकरण में पढ़े जाने के कारण वायु शब्द विद्वान् का बोधक है, किसी अन्य वस्तु का नहीं ।।१।।

प्र सोता जीरो अध्वरेष्वस्थात्सोममिन्द्राय वायवे पिबध्यै ।
प्र यद्वां मध्वो अग्रियं भरन्त्यध्वर्यवो देवयन्तः शचीभिः ।।२।।

प्र । सोता । जीरः । अध्वरेषु । अस्थात् । सोमं । इन्द्राय । वायवे । पिबध्यै । प्र । यत् । वां । मध्वः । अग्रियं । भरन्ति । अध्वर्यवः । देवऽयन्तः । शचीभिः ।।२।।

पदार्थः—(अध्वर्यवः) यज्ञं बिभ्राणा वैदिकाः (अध्वरेषु) यज्ञेषु (सोमं) सोमरसम् (अस्थात्) स्थिरीकुर्वन्ति, यतः (इन्द्राय) कर्मयोगिनः (वायवे) ज्ञानयोगिनः (पिबध्यै) पानार्थम्, अध्वर्यवश्च (शचीभिः) कर्मभिः (देवयन्तः) प्रार्थनां कुर्वन्तः (अग्रियम्) सारमिमं सोमरसम् (भरन्ति) धारयन्ति (यत्) यः (मध्वम्) मधुरः तथा (वाम्) भवदर्थं मया निर्मितः ।।

पदार्थ—(अध्वर्यवः) यज्ञों के धारण करनेवाले अध्वर्यु लोग (अध्वरेषु) यज्ञों में (सोमं) सोम रस को (अस्थात्) स्थिर करते हैं क्योंकि (इन्द्राय) कर्मयोगी, (वायवे) ज्ञानयोगी के (पिबध्यै) पिलाने के लिए और अध्वर्यु लोग (शचीभिः) कर्मों के द्वारा (देवयन्तः) प्रार्थना करते हुए (अग्रियम्) सार भूत इस सोमरस को (भरन्ति) धारण करते हैं (यत्) जो (मध्वं) मीठा है और (वाम्) तुम विद्वान् लोगों के निमित्त बनाया गया है।

भावार्थ—परमात्मा उपदेश करते हैं कि हे यजमान लोगो ! तुम सुन्दर-सुन्दर पदार्थों के रस निकाल कर विद्वानों को तृप्त करो ताकि वे प्रसन्न होकर तुमको उपदेश दें ।।२।।

प्र याभिर्यासि दाश्वांसमच्छा नियुद्भिर्वायविष्टये दुरोणे ।
नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः ।।३।।

प्र । याभिः । यासि । दाश्वांसं । अच्छ । नियुत्ऽभिः । वायो इति । इष्टये । दुरोणे । नि । नः । रयिं । सुऽभोजसं । युवस्व । नि । वीरं । गव्यं । अश्व्यं । च । राधः ।।३।।

पदार्थः—(वायो) हे ज्ञानयोगिन् ! (इष्टये) यज्ञाय (दुरोणे) यज्ञशालायाम् (नियुद्भिः) याज्ञिकैराहूतः (यासि) तत्र गच्छ गत्वा च (वीरम्) वीरपुरुषम् (गव्यम्) गोसंघम् (अश्व्यम्) अश्वसंघं च (च) च पुनः (राधः) अन्नादिपदार्थम् (युवस्व) देहि (सुभोजसम्) सुष्ठुभोज्यपदार्थम् (रयिम्) धनानि च देहि ।।

पदार्थ—(वायो) हे ज्ञानयोगी विद्वन् ! (इष्टये) यज्ञ के लिए (दुरोणे) यज्ञ मण्डपों में जाकर (नियुद्भिः) याज्ञिक लोगों द्वारा आह्वान किये हुए आप (यासि) जाकर प्राप्त होओ और वहाँ जाकर (वीरं) वीरतायुक्त पुरुष (गव्यं) गौएँ (अश्व्यं) घोड़े (च) और (राधः) धन को (युवस्व) दें और (सुभोजसम्) सुन्दर-सुन्दर भोजन (रयिं) धनादि पदार्थ दें ।।

भावार्थ—परमात्मा उपदेश करते हैं कि यजमानों से आह्वान किये हुए विद्वान् लोग यज्ञमण्डपों में जाकर जनता को गौएँ, घोड़े और धनादि ऐश्वर्यों के उत्पन्न करने का उपदेश करें ।।३।।

ये वायवं इन्द्रमादनास आदेवासो नितोशनासो अर्यः ।
घ्नन्तो वृत्राणि सूरिभिः ष्याम सासह्वांसो युधा नृभिरमित्रान् ॥४॥

ये । वायवे । इन्द्रऽमादनासः । आऽदेवासः । निऽतोशनासः । अर्यः । घ्नन्तः । वृत्राणि । सूरिऽभिः । स्याम । ससह्वांसः । युधा । नृऽभिः । अमित्रान् ॥४॥

पदार्थः—(ये) ये पुरुषाः (वायवे) कर्मयोगिषु विश्वसन्ति (इन्द्रमादनासः) ज्ञानयोगिनश्च सत्कुर्वन्ति तथा (आदेवासः) विदुषश्च सत्कुर्वन्ति, ते (अर्यः नितोशनासः) शत्रून् घ्नन्तः तथा (सूरिभिः) विद्वद्भिः (वृत्राणि) अज्ञानानि नाशयन्त इति ब्रुवन्ति (स्याम) वयं सत्यपरा भवेम (अमित्रान्) अन्यायमाचरतः शत्रून् (युधा) युद्धे (नृभिः) न्यायपथे सुदृढैर्जनैः (ससह्वांसः) हन्यामेति ।।

पदार्थ—(ये) जो पुरुष (वायवे) कर्मयोगी विद्वानों पर विश्वास रखते हैं (इन्द्रमादनासः) ज्ञानयोगी विद्वान् का सत्कार करते हैं तथा (आदेवासः) विद्वान् पुरुषों का सत्कार करते हैं वे (अर्य्यः) शत्रुओं को (नितोशनासः) नाश करते हुए और (सूरिभिः) विद्वानों से (घ्नन्तः) अज्ञानों का नाश करते हुए यह कथन करते हैं कि (स्याम) हम लोग सत्यपरायण होकर (अमित्रान्) अन्यायकारी शत्रुओं को (युधा) युद्ध में (नृभिः) न्याय पथ पर दृढ़ रहनेवाले मनुष्यों के द्वारा (ससह्वांसः) नाश करें ।।

भावार्थ—जो सर्वव्यापक परमात्मा पर विश्वास रख कर अन्यायकारियों के दमन के लिए उद्यत होते हैं वे सदैव विजयलक्ष्मी का लाभ करते हैं अर्थात् उनके गले में विजयलक्ष्मी अवश्यमेव जयमाला पहनाती है ।।४।।

आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि यज्ञम् ।
वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥५॥

आ । नः । नियुत्ऽभिः । शतिनीभिः । अध्वरं । सहस्रिणीभिः । उप । याहि । यज्ञं । वायो इति । अस्मिन् । सवने । मादयस्व । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥५॥

पदार्थः—(वायो) हे कर्मयोगिन् ! (अध्वरं, नः) अस्माकमहिंसयज्ञे (शतिनीभिः) शतधा शक्तिभिर्व सह (सहस्रणीभिः) सहस्रधाशक्तिभिः (उपयाहि) अस्मदन्तिकमागच्छ (वायो) हे सर्वविधविद्यासु संचरिष्णो विद्वन् ! (अस्मिन्, सवने) अस्मिन्ममानेकपदार्थोत्पादने यज्ञे (मादयस्व) आनन्दं लभस्व (यूयम्) भवन्तः (स्वस्तिभिः) स्वस्तिवाग्भिः (सदा) शश्वत् (नः) अस्मान् (पात) रक्षत ।।

पदार्थ—(वायो) हे कर्मयोगिन् विद्वन् ! (नः) हमारे (अध्वरं) इस अहिंसारूपयज्ञ में आप आएँ (शतिनीभिः) अपने क्रियाकौशल के सैकड़ों प्रकार की शक्तियों को लेकर (सहस्त्र-

णीभिः) सहस्रों प्रकार की शक्तियों को लेकर (उपयाहि) आएँ (वायो) हे सर्वविद्या में गतिशील विद्वन् ! (अस्मिन्) हमारे इस (सवने) पदार्थ विद्या के उत्पन्न करनेवाले यज्ञ में आकर आप (मादयस्व) आनन्द को लाभ करें और (यूयम्) आप विद्वान् लोग स्वस्तिवाचनों से (नः) हमको (सदा) सदैव (पात) पवित्र करें ।।

भावार्थ—इस मन्त्र में परमात्मा ने सैकड़ों और सहस्त्रों शक्तियों वाले कर्म्मयोगी विद्वानों के आवाहन करने का उपदेश किया है कि हे यजमानो ! तुम अपने यज्ञों में ऐसे विद्वानों को बुलाओ जिनकी पदार्थ विद्या में सैंकड़ों प्रकार की शक्तियें हैं, उनको बुलाकर तुम उनसे सदुपदेश सुनो ।।५।।

९२ सूक्त और १४ वर्ग समाप्त हुआ ।।

अथाष्टर्चस्य त्रिनवतितमस्य सूक्तस्य—

१–८ वसिष्ठ ऋषिः ।। इन्द्राग्नी देवते ।। छन्दः—१, ८ निचृत्त्रिष्टुप् । २, ५ आर्षी त्रिष्टुप् । ३, ४, ६, ७ विराट् त्रिष्टुप् ।। धैवतः स्वरः ।।

शुचिं नु स्तोमं नवजातमद्येन्द्राग्नी वृत्रहणा जुषेथाम् ।
उभा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा ॥१॥

शुचिं । नु । स्तोमं । नवऽजातं । अद्य । इन्द्राग्नी इति । वृत्रऽहना । जुषेथां ।
उभा । हि । वां । सुऽहवा । जोहवीमि । ता । वाजं । सद्यः । उशते । धेष्ठा ।।१।।

पदार्थः—(इन्द्राग्नी) हे ज्ञानिविज्ञानिनौ विद्वांसौ ! (वृत्रहणा) शत्रूणां हन्तारौ ! (अद्य) संप्रति भवन्तौ (नवजातम्) नूतनम् (स्तोमम्) यज्ञम् (जुषेथाम्) सेवेताम्, यदर्थम् (उभा, हि, वाम्) द्वावपि युवां (सुहवा) सुखाहूतौ (जोहवीमि) भृशमाह्वयामि, अतः (ता) तौ भवन्तौ (शुचि) पवित्रमिमं यज्ञम् (सद्यः) शीघ्रम् (उशते) इष्टमिच्छते यजमानाय (वाजम्) बलम् (धेष्ठा) यच्छताम् ।

पदार्थ—(इन्द्राग्नी) हे ज्ञानी विज्ञानी विद्वानो ! आप अन्यायकारी (वृत्रहणा) शत्रुओं को हनन करनेवाले हैं, आप हमारे (नवजातम्) इस नवीन (स्तोमं) यज्ञ को (जुषेथां) सेवन करें (हि) जिसलिये (उभा, वां) तुम दोनों को (सुह, वा) सुखपूर्वक बुलाने योग्य आपको (जोहवीमि) पुनः पुनः मैं बुलाता हूँ, इसलिये (ता) आप दोनों (शुचि) इस पवित्र यज्ञ को (सद्यः, उशते) कामनावाले यजमान के लिये शीघ्र ही (वाजं) बल के देनेवाला (धेष्ठा) धारण करायें ।।१।।

भावार्थ—परमात्मा उपदेश करते हैं कि हे विद्वानो ! आप यजमानों के यज्ञ को बल देनेवाला तथा कलाकौशलादि विद्याओं से शीघ्र ही फल का देनेवाला बनायें ।।१।।

ता सानसी शवसाना हि भूतं साकंवृधा शवसा शूशुवांसा ।
क्षयन्तौ रायो यवसस्य भूरेः पृङ्क्तं वाजस्य स्थविरस्य घृष्वेः ॥२॥

ता । सानसी इति । शवसाना । हि । भूतं । साकंऽवृधा । शवसा । शूशुऽवांसा । क्षयन्तौ । रायः । यवसस्य । भूरेः । पृङ्क्तं । वाजस्य । स्थविरस्य । घृष्वेः ॥२॥

पदार्थः—(हि) यतः (ता, सानसी) तादृशौ भवन्तौ सर्वैर्भजनीयौ स्तः (शवसाना, भूतम्) ज्ञानबलेन विराजन्तौ च (साकंवृधा) स्वाभाविकबलोपपन्नौ च (शूशुवांसा) ज्ञानवृद्धौ (भूरेः, रायः) भूरिधनस्य (यवसस्य) ऐश्वर्यस्य च (क्षयन्तौ) निवासौ स्तः (स्थविरस्य) परिपक्कज्ञानस्य (वाजस्य) यद्बलं तस्येश्वरौ स्तः (घृष्वेः) शत्रुन् घर्षयितु (पृङ्क्तम्) नियुज्येते भवन्तौ ॥

पदार्थ—(हि) क्योंकि आप (सानसी) प्रत्येक पुरुष के सत्सङ्ग करने योग्य हैं और (शवसाना) ज्ञान, विज्ञान की विद्या के बल से सुशोभित (भूतं) हो और (साकंवृधा) स्वाभाविक बलवाले हो (शूशुवांसा) ज्ञानवृद्ध हो (भूरेः रायः) बहुत धन और (यवसस्य) ऐश्वर्य्य के (क्षयन्तौ) ईश्वर हो (स्थविरस्य) परिपक्क ज्ञान का जो (वाजस्य) बल है उसके स्वामी हो (घृष्वेः) अन्यायकारी दुष्टों के दमन के लिये (पृङ्क्तम्) आकर आप हमारे यज्ञ को भोगो ॥२॥

भावार्थ—यजमानों को चाहिये कि वे अपने भौतिक तथा आध्यात्मिक यज्ञों में अनुभवी विद्वानों को बुला कर उनसे शिक्षा ग्रहण करें और उनसे ज्ञान और विज्ञान की विद्याओं का काम करायें ।

यज्ञ का वास्तव में यही फल है कि उससे ज्ञान तथा विज्ञान की वृद्धि हो तथा विद्वानों की सत्सङ्गति और उनका सत्कार हो ॥२॥

उपो ह यद्विदथं वाजिनो गुर्धीभिर्विप्राः प्रमतिमिच्छमानाः ।
अर्वन्तो न काष्ठां नक्षमाणा इन्द्राग्नी जोहुवतो नरस्ते ॥३॥

उपो इति । ह । यत् । विदथं । वाजिनः । गुः । धीभिः । विप्राः । प्रऽमतिं । इच्छमानाः । अर्वन्तः । न । काष्ठां । नक्षमाणाः । इन्द्राग्नी इति । जोहुवतः । नरः । ते ॥३॥

पदार्थः—(वाजिनः) ब्रह्मविद्याविषयकबलवन्त ऋत्विजः (यत्) यस्मात् (उपो, गुः) भवत्सकाशमागच्छन्ति उ इति पूरकः (विदथम्) यज्ञं च प्राप्नुवन्ति (विप्राः) मेधाविनः धीभिः कर्मभिः (प्रमतिम्, इच्छमानाः) बुद्धिं कामयमानाः (काष्ठाम्, अर्वन्तः, न) बलिनः परां काष्ठामिव प्राप्ताः (नक्षमाणाः) कर्मज्ञानोभययोगिनः (जोहुवतः) कृतावाहूताः (ते, नरः) ते नराः संसारस्य नेतारो भवन्ति ॥३॥

पदार्थ—(वाजिनः) ब्रह्मविद्या के बलवाले ऋत्विग् लोग (यत्) जो (उपो, गुः) आपको आकर प्राप्त होते हैं और (विदथं) यज्ञ को "विदन्ति जानन्ति देवान्यत्र स विदथो यज्ञः" "जिसमें देव = विद्वानों की सङ्गति हो उसको विदथ = यज्ञ कहते हैं" **विदथ इति यज्ञनामसु-पठितम् निघं०** । नित्य प्राप्त होते हैं (विप्राः) मेधावी लोग (धीभिः) कर्म्मों द्वारा (**प्रमतिमि-**

च्छमानाः) बुद्धि की इच्छा करते हुए (काष्ठां, अर्वन्तः, न) जैसे कि बलवाला पुरुष अपने व्रत की पराकाष्ठा अन्त को प्राप्त होता है इस प्रकार (नक्षमाणाः) कर्मयोगी और ज्ञानयोगी विद्वान् अर्थात् जो कर्म्म तथा ज्ञान में व्याप्त हैं (जोहुवतः) सत्कारपूर्व्वक यज्ञ में बुलाये हुए (ते, नरः) संसार के नेता होते हैं ॥३॥

भावार्थ—परमात्मा उपदेश करते हैं कि हे यजमानो ! तुम ऐसे विद्वानों को अपने यज्ञों में बुलाओ, जो कर्म्म और ज्ञान दोनों प्रकार की विद्या में व्याप्त हों और आत्मिक बल रखने के कारण दृढ़व्रती हों क्योंकि दृढ़व्रती पुरुष ही अपने लक्ष्य को प्राप्त हो सकता है, अन्य नहीं ।

इसी अभिप्राय से वेद में अन्यत्र भी कथन किया है कि "अग्ने व्रतपते व्रतं चरिष्यामि" हे परमात्मन्, आप व्रतों के पति हैं, कृपा करके मुझे भी दृढ़व्रती होने की शक्ति दें ताकि मैं असत्य का त्याग करके सत्य पथ को ग्रहण करूं । इसी भाव का उपदेश उक्त मन्त्र में किया गया है ॥३॥

गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिं यशसं पूर्वभाजम् ।
इन्द्राग्नी वृत्रहणा सुवज्रा प्र नो नव्येभिस्तिरतं देष्णैः ॥४॥

गीःऽभिः । विप्रः । प्रऽमतिं । इच्छमानः । ईट्टे । रयिं । यशसं । पूर्वऽभाजं । इन्द्राग्नी इति । वृत्रऽहना । सुऽवज्रा । प्र । नः । नव्येभिः । तिरतं । देष्णैः ॥४॥

पदार्थः—(इन्द्राग्नी) कर्मयोगिन् ज्ञानयोगिन् ! भवन्तौ (विप्रः) मेधावी नरः (ईट्टे गीर्भिः) अतः स्तुतिभिः स्तौति यतो भवन्तौ (वृत्रहणा) मोहनाशकौ स्तः (सुवज्रा) शोभनविद्यारूपशस्त्रहस्तौ च (प्रमतिम्, इच्छमानः) स च स्तोता बुद्धिकामयमानोऽतः स्तौति (रयिम्) धनम् (यशसम्) कीर्तिम् च (पूर्वभाजम्) प्रथममेव भजनीयं (देष्णेभिः) दातव्यैः (नव्येभिः) नूतनैः (प्रतिरतम्) पूर्वोक्तपदार्थैः नो वर्धयताम् ॥४॥

पदार्थ—(इन्द्राग्नी) हे कर्म्मयोगी तथा ज्ञानयोगी विद्वानो ! आपकी (ईट्टे) स्तुति (विप्रः) बुद्धिमान् लोग इसलिये करते हैं कि आप (वृत्रहणा) अज्ञान के हनन करनेवाले हैं (सुवज्रा) सुन्दर विद्यारूपी शस्त्र आपके हाथ में है (प्रमतिमिच्छमानः) बुद्धि की इच्छा करते हुए (गीर्भिः) सुन्दर वाणियों से तुम्हारी स्तुति विद्वान् लोग करते हैं और (रयिं) धन की इच्छा करते हुए तथा (यशसं) यश की इच्छा करते हुए जो (पूर्वभाजं) सबसे प्रथम भजने योग्य अर्थात् प्राप्त करने योग्य है (देष्णैः) देने योग्य (नव्येभिः) नूतन धनों से (प्रतिरतं) हमको आप बढ़ाएँ ।

भावार्थ—यश और ऐश्वर्य्य के चाहनेवाले लोगों को चाहिये कि कर्म्मयोगी और ज्ञानयोगी पुरुषों को अपने यज्ञों में बुलाएँ और बुलाकर उनसे सुमति की प्रार्थना करें, क्योंकि विद्वानों के सत्कार के बिना किसी देश में भी सुमति उत्पन्न नहीं हो सकती । इसी अभिप्राय से परमात्मा ने इस मन्त्र में विद्वानों से सुमति लेने का उपदेश किया है ॥४॥

सं यन्मही मिथती स्पर्धमाने तनूरुचा शूरसाता यतैते ।
अदेवयुं विदथे देवयुभिः सत्रा हतं सोमसुता जनेन ॥५॥१५॥

सं । यत् । मही इति । मिथती इति । स्पर्धमाने इति । तनूऽरुचा । शूरऽसाता । यतैते इति । अदेवऽयुं । विदथे । देवयुऽभिः । सत्रा । हतं । सोमऽसुता । जनेन । ॥५॥१५॥

पदार्थः—हे विद्वांसः ! (सोमसुता) शुक्लबुद्धेरुत्पादयित्र्याः ओषध्याः (जनेन) निर्मात्रा जनेन वयं भवतः सत्कुर्मः (यत् एते) यतो भवन्तः (शूरसाता) शौर्यप्रधानयज्ञं रचयितारः (तनूरुचा) तनुमात्रपोषकेण सह (स्पर्धमाने) ईर्ष्यितारः सन्ति (मही) महति (मिथती) युद्धे निपुणाश्च (विदथे) यज्ञे (सं, सत्रा, हतं,) अविद्यादिदोषरहितम् (अदेवयुम्) परमात्मस्वभावम् (देवयुभिः) ज्ञानिजनसंगत्या प्राप्ताश्च ।।५।।

पदार्थ—विद्वानो, (सोमसुता) सौम्यस्वभाव को उत्पन्न करनेवाले ओषधियों को बनानेवाले (जनेन) मनुष्य द्वारा हम आपका सत्कार करते हैं, (यत्) जो आप (शूरसाता) वीरतारूपी यज्ञों के रचयिता हैं (तनूरुचा) केवल तनुपोषक लोगों के साथ (स्पर्धमाने) स्पर्धा करनेवाले हैं (मही) बड़े-बड़े (मिथती) युद्धों में आप निपुण हैं (विदथे) आध्यात्मिक यज्ञों में (सं, सत्रा, हतं) अविद्यादिदोषरहित (अदेवयुम्) परमात्मा के स्वभाव को (देवयुभिः) ज्ञानी पुरुषों की सङ्गति से आप प्राप्त हैं ।

भावार्थ—इस मन्त्र में आध्यात्मिक ज्ञान का उपदेश किया है कि हे विद्वान् पुरुषो ! तुम लोग आहार व्यवहार द्वारा सौम्यस्वभाव बनानेवाले विद्वानों का सङ्ग करो तथा जो पुरुष ज्ञानयोगी हैं उनकी सङ्गति में रह कर अपने आपको परमात्मपरायण बनाओ ।।५।।

इमामु षु सोमसुतिमुप न एन्द्राग्नी सौमनसाय यातम् ।
नू चिद्धि परिमम्नाथे अस्माना वां शश्वद्भिर्ववृतीय वाजैः ।।६।।

इमां । ऊं इति । सु । सोमऽसुतिं । उप । नः । आ । इन्द्राग्नी इति । सौमनसाय । यातं । नु । चित् । हि । परिमम्नाथे इति परिऽमम्नाथे । अस्मान् । आ । वां । शश्वत्ऽभिः । ववृतीय । वाजैः ।।६।।

पदार्थः—(इन्द्राग्नी) हे ज्ञानविज्ञानविद्यावेत्तारः ! (नः) अस्माकम् (इमाम्) इदम् (सोमसुतिम्) विज्ञानविद्याया यन्त्रनिर्माणस्थानम् (सौमनसाय) अस्मन्मनः प्रसादाय (उपयातम्) आगत्य पश्यत (हि) यतः (अस्मान्) अस्मान्सर्वान् (आ) सम्यक् (नु, चित्) निश्चयेन (सु, परिमम्नाथे) आत्मसात्कुर्वन्ति भवन्तः, वयं च (वाजैः) उपयुक्तसत्कारैः (शश्वद्भिः) अनेकैः (ववृतीय) निमन्त्रयामः (वाम्) युष्मान् ।।

पदार्थ—(इन्द्राग्नी) हे ज्ञान विज्ञान विद्याओं के ज्ञाता विद्वानो ! (नः) हमारे (इमां) इस (सोमसुतिं) विज्ञानविद्या के यन्त्रनिर्माण स्थान को (सौमनसाय) हमारे मन की प्रसन्नता के लिए (उपयातं) आकर दृष्टिगोचर करें । (हि) क्योंकि (अस्मान्) हमको (आ) सब प्रकार से (नु, चित्) निश्चय करके (सु, परिमम्नाथे) आप अपनाते हैं और (वां) आपको हम लोग (वाजैः) आपके योग्य सत्कारों से (शश्वद्भिः) निरन्तर (ववृतीय) निमन्त्रित करते हैं ।

भावार्थ—परमात्मा उपदेश करते हैं कि हे यजमानो ! आप लोग ज्ञान विज्ञान के ज्ञाता विद्वानों को अपनी विज्ञानशालाओं में बुलाएँ क्योंकि ज्ञान तथा विज्ञान से बढ़कर मनुष्य के मन को प्रसन्न करनेवाली संसार में कोई अन्य वस्तु नहीं, इसलिए तुम विद्वानों की सत्संगति से मन के (सौमनस्य) अर्थात् विज्ञानादि भावों को बढ़ाओ, यही मनुष्य जन्म का सर्वोपरि फल है ।

सायणाचार्य्य ने यहाँ (मन्त्र) के अर्थ मेरे ही यज्ञ में आने के किये हैं, सो ठीक नहीं क्योंकि यज्ञान्त में ऋत्विगादि विद्वान् और यजमान मिलकर परमात्मा से पापनिवृत्यर्थ यह प्रार्थना करें ।।६।।

सो अ॑ग्न ए॒ना नम॑सा॒ समि॒द्धोऽच्छा॑ मि॒त्रं वरु॑ण॒मिन्द्रं॑ वोचेः ।
यत्सी॒माग॑श्चकृ॒मा तत्सु मृ॑ळ॒ तद॑र्य॒मादि॑तिः शिश्रथन्तु ॥७॥

सः । अ॒ग्ने॒ । ए॒ना । नम॑सा । सम्ऽइ॑द्धः । अच्छ॑ । मि॒त्रं । वरु॑णं । इन्द्रं॑ । वो॒चेः । यत् । सीं॑ । आग॑ः । च॒कृ॒म । तत् । सु । मृ॒ळ॒ । तत् । अ॒र्य॒मा । अदि॑तिः । शि॒श्र॒थ॒न्तु॒ ॥७॥

पदार्थः—(अग्ने) हे ज्ञानस्वरूप परमात्मन् ! भवान् (नमसा) विनयेन (समिद्धः) प्रसन्नः सन् (इन्द्रम् मित्रं, वरुणं,) अध्यापकानुपदेशकांश्च श्रेष्ठान् (अच्छ, वोचेः) इदमुपदिश यत् ते यजमानं पापकर्मणः (शिश्रथन्तु) वियोजयन्तु (यत्, सीम्) यत् किञ्चित् (आगः) पापम् (चकृम) अकृष्महि (तत्) तत् पापकर्म (सु, मृळ) अपहृत्य शुष्कयन्तु (अर्यमा) तन्निवृत्तिं च न्यायकारिणः (अदितिः) विभोश्च परमात्मनः वाञ्छामः ॥७॥

पदार्थ—(अग्ने) हे ज्ञानस्वरूप परमात्मन् ! (सः) आप (नमसा) विनय से (समिद्धः) प्रसन्न हुए (इन्द्रं, मित्रं, वरुणं) श्रेष्ठ अध्यापक और उपदेशक को (अच्छ, वोचेः) यह श्रेष्ठ उपदेश करो कि वे लोग यजमानों से पापकर्मों को (शिश्रथन्तु) वियुक्त करें और (यत्) जो (सीं) कुछ हम ने (आगः) पापकर्म्म (चकृम) किये हैं (तत्) वह (सुमृळ) दूर करें और उनकी निवृत्ति हम (अर्य्यमा) न्यायकारी और (अदितिः) अखण्डनीय परमात्मा से न्यायपूर्वक चाहते हैं ॥७॥

भावार्थ—पापों की निवृत्ति पश्चात्ताप से होती है, परमात्मा जिस पर अपनी कृपा करते हैं वही **पुरुष** अपने मन से पापों की निवृत्ति के लिये प्रार्थना करता है, अर्थात् मनुष्य में परमात्मा की कृपा से विनीतभाव आता है अन्यथा नहीं; यहां सञ्चित और क्रियमाण कर्म्मों की निवृत्ति से तात्पर्य्य है, प्रारब्ध कर्म्मों से नहीं ॥७॥

ए॒ता अ॑ग्न आशु॒षा॒णास॑ इ॒ष्टीर्यु॒वोः सचा॒भ्य॑श्याम॒ वाजा॑न् ।
मेन्द्रो॑ नो॒ विष्णु॑र्म॒रुतः॒ परि॑ ख्यन्यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥८॥

ए॒ताः । अ॒ग्ने॒ । आ॒शु॒षा॒णासः॑ । इ॒ष्टीः । यु॒वोः । सचा॑ । अ॒भि । अ॒श्या॒म॒ । वाजा॑न् । मा । इन्द्रः॑ । नः॒ । विष्णुः॑ । म॒रुतः॑ । परि॑ । ख्य॒न् । यू॒यं । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥८॥

पदार्थः—(इन्द्रः) सर्वशक्तिमान् परमात्मा (विष्णुः) सर्वव्यापकः (एताः मरुतः) सर्वरक्षकः (नः) अस्मान् (मा) न (परिख्यन्) त्यजेत् (अग्ने) हे कर्मयोगिन् विद्वन्, (आशुषाणासः) भवता सहचारेण (युवोः) भवतः (इष्टीः) ज्ञानयज्ञं भवतः सहचारित्वं च (सचाभ्यश्याम) कदापि नो जह्याम् (वाजान्) भवतो बलप्रदोपदेशान् कदापि न त्यजेयम् (यूयम्) भवन्तः (स्वस्तिभिः) कल्याणवाग्भिः (सदा) निरन्तरं (नः) अस्मान् (पात) रक्षन्तु ॥८॥

इति त्रिनवतितमं सूक्तं षोडशो वर्गश्च समाप्तः ॥

पदार्थ—(इन्द्रः) सर्वशक्तिमान् (विष्णुः) सर्वव्यापक (एताः, मरुतः) सर्वरक्षक परमात्मा (नः) हमको (मा) मत (परिख्यन्) छोड़े, (अग्ने) हे कर्म्मयोगिन् तथा ज्ञानयोगिन् विद्वन्, (आशुषाणासः) आपकी संगति में रहते हुए हमको (युवोः) आपकी (इष्टीः) यह ज्ञानयज्ञ और आपकी सङ्गति को हम लोग (सचाभ्यश्याम) कभी न छोड़ें तथा (वाजान्) आपके बलप्रद उपदेशों का हम कदापि त्याग न करें, और ईश्वर की कृपा से (यूयं) आप लोग (स्वस्तिभिः) स्वस्तिवचनों से (नः) हमको (सदा) सदैव (पात) पवित्र करें ॥८॥

भावार्थ—इस मन्त्र में इस बात की शिक्षा है कि पुरुष को चाहिये कि वह सत्पुरुषों की सङ्गति से बाहर कदापि न रहे और ईश्वर परमात्मा के आगे हृदय खोल कर निष्पाप होने की सदैव प्रार्थना किया करे, इसी से मनुष्य का कल्याण होता है। केवल अपने उद्योग के भरोसे पर ईश्वर और विद्वान् पुरुषों की (उपेक्षा) अर्थात् उनमें उदासीन दृष्टि कदापि न करे ॥८॥

९३वां सूक्त १६वां वर्ग समाप्त हुआ ॥

अथ द्वादशर्चस्य चतुर्नवतितमस्य सूक्तस्य—
१–१२ वसिष्ठ ऋषिः ॥ इन्द्राग्नी देवते ॥ छन्दः १, ३, ८, १०, आर्षी निचृद् गायत्री २, ४–६, ७, ६, ११ आर्षी गायत्री । १२ आर्षी निचृदनुष्टुप् ॥ स्वरः १–११ षड्जः । १२ गान्धारः ॥

अथ सद्गुणान् ग्रहीतुं यज्ञेषु कर्मयोग्यादीनामावाहनमुपदिश्यते—

अब सद्गुणों के ग्रहण के लिये कर्म्मयोगी तथा ज्ञानयोगियों का यज्ञ में आवाहन कथन करते हैं—

इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः ।
अभ्राद्वृष्टिरिवाजनि ॥१॥

इयम् । वाम् । अस्य । मन्मनः । इन्द्राग्नी इति । पूर्व्यऽस्तुतिः । अभ्रात् । वृष्टिःऽइव । अजनि ॥१॥

पदार्थः—(इन्द्राग्नी) हे कर्मयोगिन् ज्ञानयोगिंश्च विद्वांसौ ! (वाम्) युवयोः (इयं) क्रियमाणा (पूर्व्यस्तुतिः) मुख्यस्तुतिः (अभ्रात्) मेघमण्डलात् (वृष्टिः, इव) वर्षणमिव (अजनि) सद्भावमुत्पादयति (अस्य, मन्मनः) अस्य स्तुतिकर्तुर्हृदयमपि शोधयति ॥

पदार्थ—(इन्द्राग्नी) हे कर्मयोगी तथा ज्ञानयोगी विद्वानो ! (वां) आपकी (इयं) यह (पूर्व्यवंस्तुतिः) मुख्यस्तुति (अभ्रात्) मेघमण्डल से (वृष्टिः, इव) वृष्टि के समान (अजनि) सद्भावों को उत्पन्न करती है (अस्य) इस (मन्मनः) स्तोता के हृदय को भी शुद्ध करती है ॥

भावार्थ—परमात्मा उपदेश करते हैं कि जो लोग अपने विद्वानों के सद्गुणों को वर्णन करते हैं, वे मानों सद्गुणकीर्तनरूप वृष्टि से अङ्कुरों के समान प्रादुर्भाव को प्राप्त होते हैं ॥

तात्पर्य्य यह है कि जब जिज्ञासु लोगों की वृत्ति विद्वानों के सद्गुणों की ओर लगती है तब वे स्वयं भी सद्भावसम्पन्न होते हैं और प्रजा में भी सद्भावों की वृष्टि करते हैं, इसलिये प्रत्येक मनुष्य का कर्तव्य है कि वह विद्वानों के गुणों का कीर्तन करे ।।१।।

शृणुतं जरितुर्हवमिन्द्राग्नी वनतं गिरः ।
ईशाना पिप्यतं धियः ।।२।।

शृणुतं । जरितुः । हवं । इन्द्राग्नी इति । वनतं । गिरः । ईशाना । पिप्यतं । धियः ।।२।।

पदार्थः—(इन्द्राग्नी) हे विद्वांसौ पूर्वोक्तौ ! भवन्तौ (जरितुः) जिज्ञासूनाम् (हवम्) आह्वानम् (शृणुतम्) आकर्णयताम् (ईशाना) ऐश्वर्यसम्पन्ना भवन्तः (गिरः) तद्वाणीः (वनतम्) शोधयताम् तथा तेषाम् (धियः) बुद्धीः (पिप्यतम्) वर्द्धयतां च ।।२।।

पदार्थ—(इन्द्राग्नी) हे कर्मयोगी तथा ज्ञानयोगी विद्वानो ! आप (जरितुः) जिज्ञासु लोगों के (हवं) आह्वानों को (शृणुतं) सुनें, (ईशाना) ऐश्वर्य्यसम्पन्न आप (गिरः) उनकी वाणियों को (वनतं) संस्कृत अर्थात् शुद्ध करें और उनके (धियः) कर्मों को (पिप्यतं) बढ़ायें ।।

भावार्थ—परमात्मा उपदेश करते हैं कि हे विद्वानो ! तुम अपने जिज्ञासुओं की वाणिओं पर ध्यान दो और उनके कर्मों के सुधार के लिए उनको सदुपदेश दो, ताकि वे सत्कर्मी बन कर संसार का सुधार करें ।।२।।

सम्प्रत्युक्त विदुषां सद्गुणग्रहणं कथ्यते—

अब उक्त विद्वानों से सद्गुणों का ग्रहण करना कथन करते हैं—

मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये ।
मा नो रीरधतं निदे ।।३।।

मा । पापऽत्वाय । नः । नरा । इन्द्राग्नी इति । मा । अभिऽशस्तये । मा । नः । रीरधतं । निदे ।।३।।

पदार्थः—(इन्द्राग्नी) हे कर्मज्ञानोभययोगिनौ विद्वांसौ ! भवन्तौ (नरा) शुभमार्गनेतारौ स्तः अतः भवत्सुसंसर्गेण (अभिशस्तये) दमनयोग्यः (मा) न स्याम्, तथा (नः) मां (मा, रीरधतम्) हिंसकं मा कार्ष्टाम् (निदे) निन्दकम् (पापत्वाय) पापाचारिणं च माम् (मा) मा कार्ष्टाम् ।।३।।

पदार्थ—(इन्द्राग्नी) हे कर्मयोगी तथा ज्ञानयोगी विद्वानो ! आप (नरा) शुभमार्गों के नेता हैं; आपके सत्सङ्ग से (अभिशस्तये) शत्रुदमन के योग्य हम (मा) मत हों और (नः) हमको (मा, रीरधतं) हिंसा के भागी न बनायें और (निदे) निन्दा के भागी मत बनायें (पापत्वाय) पाप के लिए हमारा जीवन (मा) मत हो ।।

भावार्थ—विद्वानों से मिलकर जिज्ञासुओं को यह प्रार्थना करनी चाहिए कि आपके सङ्ग से हम में ऐसा बल उत्पन्न हो कि हमको शत्रु कभी दबा न सकें और हम कोई ऐसा काम न करें, जिससे हमारी संसार में निन्दा हो । और हमारा मन कदापि पाप की ओर न जाय ।।३।।

इन्द्रे॑ अ॒ग्ना नमो॑ बृ॒हत्सु॑वृ॒क्तिमेर॑यामहे ।
धि॒या धेना॑ अव॒स्यव॑: ॥४॥

इन्द्रे॑ । अ॒ग्ना । नम॑: । बृ॒हत् । सु॒ऽवृ॒क्तिं । आ । ई॒र॒या॒म॒हे॒ । धि॒या । धेना॑: । अ॒व॒स्यव॑: ॥४॥

पदार्थः—(इन्द्रे) वयं कर्मयोगिनं (अग्ना) ज्ञानयोगिनं च (नमः) नमस्कुर्याम तथा (बृहत्सुवृक्तिमेरयामहे) ताभ्यां सह नम्रीभूय समाचरेम (धिया, धेनाः) अनुष्ठानरूपवाण्या (अवस्यवः) रक्षायै तौ याचेमहि च ॥४॥

पदार्थ—हम (इन्द्रे) कर्मयोगी (अग्ना) ज्ञानयोगी के लिए (नमः) नमस्कार करें और (बृहत्सुवृक्तिमेरयामहे) हम उनके साथ बड़ी नम्रतापूर्वक बर्ताव करें। (धिया धेनाः) अनुष्ठान-रूपवाणी से हम उनसे (अवस्यवः) रक्षा की याचना करें ॥

भावार्थ—जो लोग विद्वानों के साथ रह कर अपनी वाणी को अनुष्ठानमयी बनाते हैं अर्थात् कर्मयोगी बन कर उक्त विद्वानों की सङ्गति करते हैं वह संसार में सदैव सुरक्षित होते हैं ॥४॥

ता हि शश्व॑न्त॒ ईळ॑त इ॒त्था विप्रा॑स ऊ॒तये॑ ।
स॒बाधो॑ वाज॑सातये ॥५॥

ता । हि । शश्व॑न्तः । ईळ॑ते । इ॒त्था । विप्रा॑सः । ऊ॒तये॑ । स॒ऽबाधः॑ । वाज॑ऽसातये ॥५॥

पदार्थः—(विप्रासः) मेधाविनः (ऊतये) स्वरक्षायै (इत्था) इत्थम् (शश्वतः) सदैव (ता हि) निश्चयेन (सबाधः, वाजसातये) विघ्नबाधिता स्वबलाय सुखाय च (ईळते) ज्ञानयोगिनं कर्मयोगिनं च स्तुवन्ति ॥५॥

पदार्थ—(सबाधः) पीड़ित हुए (वाजसातये) यज्ञों में (विप्रासः) मेधावी लोग (ऊतये) अपनी रक्षा के लिए (इत्था) इस प्रकार (शश्वन्तः) निरन्तर (ता, हि) निश्चय करके उक्त कर्मयोगी, ज्ञानयोगी की (ईळते) स्तुति करते हैं ॥

भावार्थ—जो लोग इस भाव से यज्ञ करते हैं कि उनकी बाधायें निवृत्त होवें, अपने यज्ञों में कर्मयोगी, ज्ञानयोगी विद्वानों को अवश्यमेव बुलायें, ताकि उनके सत्सङ्ग द्वारा ज्ञान और कर्म से सम्पन्न होकर सब बाधाओं को दूर कर सकें ॥५॥

ता वां॑ गी॒र्भिर्वि॑प॒न्यव॒: प्रय॑स्वन्तो हवामहे ।
मे॒धसा॑ता सनि॒ष्यव॑: ॥६॥१७॥

ता । वां॒ । गी॒ःऽभिः । वि॒प॒न्यव॑: । प्रय॑स्वन्तः । ह॒वा॒म॒हे॒ । मे॒धऽसा॑ता । स॒नि॒ष्यव॑: ॥६॥१७॥

पदार्थः—(सनिष्यवः) आत्मानमुन्निनीषवः (विपन्यवः) साहित्यमिच्छन्तश्च वयं (प्रयस्वन्तः) प्रयत्नवन्तो भूत्वा (ता, वां) कर्मज्ञानोभययोगिनं (मेधसाता) स्वयज्ञेषु (गीर्भिः) स्वनम्रवाग्भिः (हवामहे) आह्वयामः सदुपदेशार्थम् ॥६॥

पदार्थ—(सनिष्यवः) अभ्युदय चाहनेवाले (विपन्यवः) साहित्य चाहनेवाले हम (प्रयस्वन्तः) अनुष्ठानी बन कर (ता, वां) कर्मयोगी और ज्ञानयोगी को (मेधसाता) अपने यज्ञों में गीर्भिः) अपनी नम्र वाणियों से (हवामहे) बुलाते हैं ताकि वे आकर हमको सदुपदेश करें ॥

भावार्थ—संसार में अभ्युदय और शोभन साहित्य उन्हीं लोगों का बढ़ता है, जो लोग अपने यज्ञों में सदुपदेष्टा कर्मयोगी और ज्ञानयोगियों को बुलाकर सदुपदेश सुनते हैं ॥६॥

इन्द्राग्नी अवसा गतमस्मभ्यं चर्षणीसहा ।
मा नो दुःशंस ईशत ॥७॥

इन्द्राग्नी इति । अवसा । आ । गतं । अस्मभ्यं । चर्षणिऽसहा । मा । नः । दुःऽशंसः । ईशत ॥७॥

पदार्थः—(चर्षणीसहा) हे दुष्टनाशकाः (इन्द्राग्नी) कर्मयोगिनो ज्ञानयोगिनश्च विद्वांसः ! भवन्तः (अवसा) सहैश्वर्येण (आगतम्) आयान्तु, (दुःशंसः) दुष्टाः (नः) अस्माकम् (मा, ईशत) अभिभवितारो न स्युः ॥७॥

पदार्थ—(चर्षणीसहा) हे दुष्टों के दमन करनेवाले (इन्द्राग्नी) कर्मयोगी ज्ञानयोगी विद्वानो ! आप (अवसा) ऐश्वर्य्य के साथ (आगतं) हमारे यज्ञों में आवें और हमारे (दुःशंसः) शत्रु (नः) हमको (मा, ईशत) न सतावें ॥

भावार्थ—परमात्मा उपदेश करते हैं कि याज्ञिक लोगो ! तुम अपने यज्ञों में ऐसे विद्वानों को बुलाओ जो दुष्टों के दमन करने और ऐश्वर्य्य के उत्पन्न करने में समर्थ हों ॥७॥

मा कस्य नो अररुषो धूर्तिः प्रणङ्मर्त्यस्य ।
इन्द्राग्नी शर्म यच्छतम् ॥८॥

मा । कस्य । नः । अररुषः । धूर्तिः । प्रणक् । मर्त्यस्य । इन्द्राग्नी । शर्म । यच्छतम् ॥८॥

पदार्थः—(इन्द्राग्नी) हे पूर्वोक्ता विद्वांसः ! (कस्य) कस्यचिदपि (अररुषः, मर्त्यस्य) दुष्टमनुजस्य (धूर्तिः) अनिष्टैषिणम् (नः) माम् (मा, प्रणक्) मा विदधतु (शर्म) सुखं च (यच्छतम्) ददतु ॥८॥

पदार्थ—(इन्द्राग्नी) हे कर्मयोगी, ज्ञानयोगी विद्वानो ! (कस्य) किसी (अररुषो मर्त्यस्य) दुष्ट मनुष्य का भी (नः) हमको (धूर्तिः) अनिष्टचिन्तन करनेवाला (मा प्रणक्) मत बनाएँ और (शर्म) शमविधि (यच्छतं) दें ॥

भावार्थ—परमात्मा उपदेश करते हैं कि हे जिज्ञासु जनो ! तुम अपने विद्वानों से 'शमविधि' की शिक्षा लो अर्थात् तुम्हारा मन किसी में भी दुर्भावना का पात्र न बने किन्तु तुम सबके कल्याण की सदैव इच्छा करो । इस भाव को अन्यत्र भी वर्णन किया है कि "मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्" यजु० तुम सबको मित्रता की दृष्टि से देखो ॥८॥

गोमद्धिरण्यवद्वसु यद्वामश्वावदीमहे ।
इन्द्राग्नी तद्वनेमहि ॥९॥

गोऽमत् । हिरण्यऽवत् । वसु । यत् । वां । अश्वऽवत् । ईमहे । इन्द्राग्नी इति । तत् । वनेमहि ॥९॥

पदार्थः—(इन्द्राग्नी) हे ज्ञानयोगिन् कर्मयोगिन् च ! भवत्सदुपदेशेनाहम् (गोमत्) गोसमृद्धम्, (हिरण्यवत्) सुवर्णसमृद्धम् (अश्वावत्) अश्वसमृद्धं च (यद्, वसु) यद्धनम् तदवाप्तये (ईमहे) प्रार्थयामहे (तद्, वनेमहि) तदवाप्नुयाम ॥९॥

पदार्थ—(इन्द्राग्नी) हे कर्मयोगी, ज्ञानयोगी विद्वानो ! आप के सदुपदेश से हम (हिरण्यवत्) रत्न, (अश्वावत्) अश्व, (गोमत्) गौवें इत्यादि अनेक प्रकार के (यद् वसु) जो धन हैं उनकी प्राप्ति के लिए हम (ईमहे) यह प्रार्थना करते हैं कि (तद्, वनेमहि) उनको हम प्राप्त हों ॥

भावार्थ—उक्त विद्वानों के सदुपदेश से हम सब प्रकार के धनों को प्राप्त हों ॥९॥

यत्सोम आ सुते नर इन्द्राग्नी अजोहवुः ।
सप्तीवन्ता सपर्यवः ॥१०॥

यत् । सोमे । आ । सुते । नरः । इन्द्राग्नी इति । अजोहवुः । सप्तिऽवन्ता । सपर्यवः ॥१०॥

पदार्थः—(इन्द्राग्नी) हे कर्मज्ञानयोगिनौ ! (नरः) यज्ञस्य नेतारः ऋत्विगादयः (यत्) यदा (सोमे, सुते) सोमरसे सिद्धे (सपर्यवः) भवदुपासकाः (अजोहवुः) आह्वयेयुः (सप्तीवन्ताः) तदा सदुपदिश्य तान् सप्तविधैरनेकाविधैर्धनैर्योजयताम् ॥१०॥

पदार्थ—हे (इन्द्राग्नी) कर्म्मयोगी तथा ज्ञानयोगी विद्वानो ! (नरः) यज्ञों के नेता ऋत्विगादि, (यत्) यदा जब (सोमे) सोम औषधि के (सुते) बनने के समय (सपर्यवः) आपके उपासक जब उक्त समय में (अजोहवुः) आपको बुलाएँ तो आप वहाँ जाकर उनको सदुपदेश करें, (सप्तीवन्तः) आप ज्ञानसंपन्न हैं ॥

भावार्थ—परमात्मा उपदेश करते हैं कि हे विद्वानो ! आप ऋत्विगादिक विद्वानों के यज्ञों में जाकर उनकी शोभा को अवश्यमेव बढ़ाएँ ॥१०॥

उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा ।
आङ्गूषैराविवासतः ॥११॥

उक्थेभिः । वृत्रहन्ऽतमा । या । मन्दाना । चित् । आ । गिरा । आङ्गूषैः । आऽविवासतः ॥११॥

पदार्थः—(वृत्रहन्तमा) हे अज्ञाननाशकौ ज्ञानकर्मयोगिनौ ! (उक्थेभिः) परमात्मस्तुतिपरकैर्वेदमन्त्रैः (मन्दाना) प्रसीदन्तः (चिदा) अथवा (गिरा) भवदाह्वानप्रयोज्यवाग्भिः (आङ्गुषैः) तारमुच्चार्यमाणाभिः (आविवासतः) समेत्य ज्ञानकर्मयज्ञं विभूषयताम् ॥११॥

पदार्थ—(वृत्रहन्तमा) हे अज्ञान के नाश करनेवाले कर्म्मयोगी तथा ज्ञानयोगी विद्वानो ! आप (उक्थेभिः) परमात्मस्तुतिविधायक वेदमन्त्रों द्वारा (मन्दाना) प्रसन्न होते हुए (चिदा) अथवा (गिरा) आपके आवाहनविधायक वाणियों से (आङ्गूषैः) जो उच्चस्वर से पढ़ी गई हैं उनसे आकर ज्ञानयज्ञ तथा कर्म्मयज्ञ को अवश्यमेव विभूषित करें ॥

भावार्थ—इस मन्त्र में कर्मयोगी और ज्ञानयोगियों से अज्ञान के नाश करने की प्रार्थना का विधान है ॥११॥

ताविद्दुःशंसं मर्त्यं दुर्विद्वांसं रक्षस्विनम् ।
आभोगं हन्मना हतमुदधिं हन्मना हतम् ॥१२॥१८॥

तौ । इत् । दुःऽशंसं । मर्त्यं । दुःऽविद्वांसं । रक्षस्विनं । आऽभोगं । हन्मना । हतं । उदऽधिं । हन्मना । हतम् ॥१२॥१८॥

पदार्थः—(इद्दुःशंसम्) हे विद्वांसः ! दुष्ट पुरुषान् (दुर्विद्वांसम्) वेदे दुरूपयोगं निरूपयतः (रक्षस्विनम्) रक्षःस्वभावान् (आभोगम्) बलवदादाय परद्रव्यस्य भोक्तॄन् (हन्मना) स्वशस्त्रविद्यया (हतम्) नाशयत यथा (उदधिम्) समुद्रः (हन्मना) विद्वन्निर्मितयन्त्रेण (हतम्) मथ्यते तद्वत् ॥१२॥

चतुर्नवतितमं सूक्तमष्टादशो वर्गश्च समाप्तः ॥

पदार्थ—हे विद्वानो, आप (इद्दुःशंसं) दुष्ट पुरुषों को जो (दुर्विद्वांसं) विद्या का दुरुपयोग करते हैं उनको (रक्षस्विनं) जो राक्षसभावोंवाले हैं (आभोगं) अन्य अधिकारियों से छीन कर जो स्वयं भोग करते हैं (हन्मना) उनको अपनी विद्या से (हतम्) नाश करो, जिस प्रकार (उदधिम्) समुद्र, विद्वानों की विद्या द्वारा (हन्मना, हतम्) यन्त्रों से मथा जाता है इस प्रकार आप अपने विद्याबल से राक्षसों का दमन करो ॥

भावार्थ—परमात्मा उपदेश करते हैं कि हे विद्वानो ! आप राक्षसी वृत्तिवाले दुष्टाचारी पुरुषों का अपने विद्याबल से नाश करो क्योंकि अन्यायाचारी अधर्म्मात्माओं का दमन विद्याबल से किया जा सकता है, अन्यथा नहीं, अतः आप इस संसार में से पापपिशाच को विद्याबल से भगाओ ॥१२॥

९४वां सूक्त और १८वां वर्ग समाप्त हुआ ॥

अथ षड्वचस्य पञ्चनवतितमस्य सूक्तस्य—

१-६ वसिष्ठ ऋषिः ॥ १, २, ४-६ सरस्वती, ३ सरस्वान् देवता ॥ छन्दः १ पादनिचृत् त्रिष्टुप् । २, ५, ६ आर्षी त्रिष्टुप् ३, ४ विराट् त्रिष्टुप् ॥ धैवतः स्वरः ॥

अथ सरस्वतीपदवाच्याया ब्रह्मविद्याया गुणा उपदिश्यन्ते—

अब प्रसङ्गसंगति से सरस्वती देवी विद्या को वर्णन करते हैं, जिसकी प्राप्ति से पुरुष कर्मयोगी और ज्ञानयोगी बनते हैं—

प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणमायसी पूः ।
प्रबाबधाना रथ्येव याति विश्वा अपो महिना सिन्धुरन्याः ॥१॥

प्र । क्षोदसा । धायसा । सस्रे । एषा । सरस्वती । धरुणं । आयसी । पूः । प्रऽबाबधाना । रथ्याऽइव । याति । विश्वाः । अपः । महिना । सिन्धुः । अन्याः ।
॥१॥

पदार्थः—(सरस्वती) सरस्वती विद्या (धरुणाम्) अखिलज्ञानाधारोऽस्ति (आयसी) लोहमिव दृढा चास्ति (पूः) अभ्युदये च नगरीव (प्र, क्षोदसा) अज्ञाननाशकेन (धायसा) वेगेन (सस्रे) सततप्रवाहेण संसारं सिञ्चतीव (एषा) इयं ब्रह्मविद्यात्मिका (प्र, बाबधाना) अत्यन्त वेगेन (रथ्या, इव) नदीव (याति) गच्छति तथा (महिना) स्वमहिम्ना (सिन्धुः) स्यन्दमाना (विश्वा, अपः) सर्वजलानां नेत्री (अन्याः) इतराऽस्ति ॥१॥

पदार्थ—(सरस्वती) यह निघण्टु २।२३। ५७ वाणी के नामों में पढ़ा है, इसलिए सरस्वती यहां विद्या का नाम है। व्युत्पति इसकी इस प्रकार **"सरो ज्ञानं विद्यतेऽस्या असौ सरस्वती"** जो ज्ञानवाली हो उसका नाम सरस्वती है। सरस्वती विद्या (धरुणम्) सब ज्ञानों का आधार है (आयसी) ऐसी दृढ़ है कि मानों लोहे की बनी हुई है (पूः) सब प्रकार के अभ्युदयों के लिए एक पुरी के सदृश है (प्र, क्षोदसा) अज्ञानों के नाश करनेवाले (धायसा) वेग से (सस्रे) अनवरत प्रवाह से संसार को सिञ्चन कर रही है (एषा) यह ब्रह्मविद्यारूप (प्र, बाबधाना) अत्यन्त वेग से (रथ्या, इव) नदी के समान (याति) गमन करती और (महिना) अपने महत्त्व से (सिन्धुः) स्यन्दन करती हुई (विश्वा, अपः) सब जलों को ले जानेवाली (अन्याः) और है ॥१॥

भावार्थ—परमात्मा उपदेश करते हैं कि हे मनुष्यो ! ब्रह्मविद्यारूपी नदी सब प्रकार के अज्ञानादि पाप पङ्कों को बहा ले जाती है और यही नदी भुवनत्रय को पवित्र करती अर्थात् अन्य जो भौतिक नदियें हैं वे किसी एक प्रदेश को पवित्र करती हैं और यह सबको पवित्र करनेवाली है, इसलिए इसकी उनसे बिलक्षणता है। तात्पर्य यह है कि यह विद्यारूपी नदी आध्यात्मिक पवित्रता का संचार और भौतिक नदी बाह्य पवित्रता का संचार करती है।

कई एक टीकाकारों ने सरस्वती शब्द के वास्तविक अर्थ को न समझ कर यहां भौतिक नदी के अर्थ किये हैं, उन्होंने अत्यन्त भूल की है जो निघण्टु में ५७ प्रकार के वाणी के अर्थों में रहते हुए भी सरस्वती शब्द को एक जलनदी के अर्थों में लगा दिया। इस प्रकार की भारी

भूलों के भरजाने से ही वेदार्थ कलङ्कित हो रहा है। अस्तु। सरस्वती शब्द से यहां ब्रह्म-विद्यारूपी नदी ग्रहण है। मालूम होता है कि वेद के ऐसे गूढ़स्थलों को न समझने से ही भारतवर्ष में नादियों की पूजा होने लग गयी ॥१॥

एकाचेतत्सरस्वती नदीनां शुचिर्यती गिरिभ्य आ समुद्रात्।
रायश्चेतन्ती भुवनस्य भूरेर्घृतं पयो दुदुहे नाहुषाय ॥२॥

एका। अचेतत्। सरस्वती। नदीनाम्। शुचिः। यती। गिरिऽभ्यः। आ। समुद्रात्। रायः। चेतन्ती। भुवनस्य। भूरेः। घृतं। पयः। दुदुहे। नाहुषाय ॥२॥

पदार्थः—(नदीनाम्) आसु भौतिकनदीषु (एका) नदी (सरस्वती, अचेतत्) सरस्वतीरूपेण सत्वमलब्ध तथा या (गिरिभ्यः) गिरेः निःसृत्य (आसमुद्रात्) समुद्रपर्यन्तमेति सा (रायः, चेतन्ती) धनस्य दात्री (शुचिः, यती) पवित्ररूपेण वहन्ती तथा च सा (भुवनस्य) संसारस्य (नाहुषाय) मनुष्यान् (भूरेः) बहुतरेण (घृतम्) जलेन (पयः) क्षीरेण च (दुदुहे) पिपर्ति ॥२॥

